4. Cf. Arthaśāstra, chap. 4. 6. अलब्धलाभार्था लब्धपरिरक्षिणी रक्षितविवर्धनी वृद्धस्य तीर्थेषु प्रतिपादनी च. These are the functions of दण्डनीति or king who symbolises Daṇḍanīti.

नित्यात्मवानात्मज कान्तरूपः । [।] [14]
रूपानुरूपैर्ललितैर्विचित्रैः
नित्य[1] प्रमोदान्वितसर्वभावः ।
प्रबुद्धपद्माकरपद्मवक्त्रो
नृणां[2] शरण्यः शरणागतानाम् । [।] [15]

11. अभवद्भुवि चक्रपालितो (ऽ) साविति नाम्ना प्रथितः प्रियो जनस्य ।
स्वगुणैरनुपस्कृतैरुदा [त्तै] : पितरं यश्च विशेषयांचकार । [16]
क्षमा प्रभुत्वं विनयो नयश्च
शौर्यं विना शौर्य मह [।] र्चनं च ।
दाक्ष्यं[3] दमो दानमदीनता च
दाक्षिण्यमानृण्यम [शू] न्यता च । [।] [17]
सौंदर्यमार्येतर·निग्रहश्च[4]
अविस्मयो धैर्य्यमुदीर्णता च ।

12. इत्येवमेते (ऽ) तिशयेन यस्मि
न्नविप्रवासेन गुणा वसन्ति । [।] [18]
न विद्यते (ऽ) सौ सकले (ऽ) पि लोके
यत्रोपमा तस्य गुणैः क्रियेत ।
स एव कात्स्न्र्येन गुणान्वितानां
बभूव नृणामुपमान भूतः । [।] [19]
इत्येवमेतानधिकानतो (ऽ) न्या
न्गुणान्प [री] क्ष्य स्वयमेव पित्रा ।
यः संनियुक्तो नगरस्य रक्षां
विशिष्य पूर्वान्प्रचकार सम्यक् । [।] [20]

13. आश्रित्य विर्य[5] [स्वभु] ज[6] द्वयस्य
स्वस्यैव नान्यस्य नरस्य दर्पं ।
नोद्वेजयामास च कंचिदेव
मस्मिन्पुरे चैव शशास दुष्टाः[7] । [।] [21]
विस्रंभमल्पे न शशाम यो (स्मिन्)
काले न लोकेषु सनागरेषु ।
यो लालयामास च पौरवर्गान्
[स्वस्येव] पुत्रान्सुपरीक्ष्य दोषान् । [।] [22]
संरंजयां च प्रकृतीर्बभूव

---

1. Read चित्रैर्नित्यं
2. Read नृणां
3. Fleet वाक्यं (?).
4. Read निग्रहश्चाविस्मयो; Sircar is inclined to put here ह्यविस्मयो, but अविस्मयो also suits the metre.
5. Read वीर्यं
6. Fleet, सुभुज (?)
7. Read दुष्टान्

पूर्व्वस्मिताभाषण-मान-दानैः ।

14. नियंन्त्रणान्योन्य-गृह-प्रवेशै (:)
संवर्द्धित-प्रीति-गृहोपचारै । [।] [23]
ब्रह्मण्य-भावेन परेण युक्तः
[शु] क्लः[1] शुचिर्दानपरो यथावत् ।
प्राप्यान्स काले विषयान्सिषेवे
धर्मार्थयोश्चा (प्य) विरोधनेन । [।] [24]
[यो···—˘— —˘ ˘···[2] पर्णदत्ता]
स्स न्यायवानत्र किमस्ति चित्रं ।
मुक्ता-कलापाम्बुज-पद्मशीता
चन्द्रात्किमुष्णं भविता कदाचित् । [।] [25]

15. अथ[3] क्रमेणाम्बुद-काल आग [ते]
[नि] दाघ-कालं प्रविदार्य तोयदैः ।
ववर्ष तोयं बहु संततं चिरं
सुदर्शनं येन बिभेद चात्वरात् । [।] [26]
संवत्सराणामधिके शते तु
त्रिंशद्भिरन्यैरपि षड्भिरेव ।
रात्रौ दिने प्रोष्ठपदस्य षष्ठे
गुप्त-प्रकाले[4] गणानां विधार्य । [।] [27]

16. इमाश्च या रैवतका[5] द्विनिर्गता [:]

---

1. Fleet शक्लः ; Sircar शुक्लः
2. Sircar's suggestion to restore is यो (ऽ) जायताम्मात् खलु पर्णदत्तात् ?
3. अथा in Fleets transcript.
4. Bhaudaji suggests गुप्तस्यकाले; प्र before काल is inappropriate, though प्रकाल may be taken in the sense of era.
5. Raivataka is a hill mentioned in Mbh., Ādi Parva ccxix 7905–17 ; in Dohad stone Inscription of Mahamuda, Ep. Ind XXIV, P. V. Jan. 1938. P. 216 ; Jaunpur Inscription of Iśānavarman C. I. I Vol III., Bṛhatsaṁhitā XIV. 19. Pargiter identifies it with the Bendā hills in Halan. (Vol. X pp. 289 ff.) Fleet has identified it with one of the two hills at Girnār and not with Girnār proper, C. I. I vol III P. 44 n 11; I. A. VI P. 239; B. C. Law identifies it with the Girnār hill. For further details see (B. C Law: Some Jain Canonical Sūtras pp. 181–82). It is to be noted that this hill was also known as Ūrjayat, otherwise known as Ūjjantgiri (Kap Copper Plate of Keṭadi Sadāśiva Nāyaka (Ep. Ind XXIV Pt. V. Jan. 1938); Ūrjayat, Lüders' list No. 965).

पलाशिनीयं सिकता[1] विलासिनी ।
समुद्र-कान्ताः[2] चिरबन्धनोषिताः
पुनः पतिं शास्त्रयथोचितं ययुः । [28]
अवेक्ष्य वर्षागमजं महोद्भ्रमं
महोदधेरूर्जयता प्रियेप्सुना ।
अनेकतीरान्तजपुष्पशोभितो

17. नदीमयो हस्त इव प्रसारितः । [।] [29]
विषाद्य [मानाः] [खलु] [सर्वतो] [ज] ना [:]
कथं कथं कार्यमिति प्रवादिनः ।
मिथो हि पूर्वापररात्रमुत्थिता
विचिन्तयां चापि बभूवुरुत्सुकाः । [।] [30]
अपीह लोके सकले सुदर्शनं
पुमां[3] हि दुर्दर्शनतां गतं क्षणात् ।

18. भवेन्न मो (ऽ) म्भोनिधि[4] तुल्यदर्शनं
सुदर्शन — ◡ ◡ .... [॥] [31]
...............वणे स भूत्वा
पितुः परां भक्तिमपि प्रदर्श्य ।
धर्मं पुरोधाय शुभानुबन्धं
राज्ञो हितार्थं नगरस्य चैव । [।] [32]

19. संवत्सराणामधिके शते तु
त्रिंशद्भिरन्यैरपि सप्तभिश्च ।

[गुप्त] [प्रकाले] [नय] शास्त्र[5] वेत्ता[6] ।
विश्वो[7] (ऽ) प्यनुज्ञात महाप्रभावः । [।] [33]
आज्यप्रणामैः विबु[8]धानथेष्ट्वा
धनैर्द्विजातीनपि तर्पयित्वा ।
पौरांस्तथाभ्यर्च्य यथार्हमानैः
भृत्यांश्च[9] पूज्यान्सुहृदश्च दानैः । [।] [34]

---

1. The river सिकता is the same as one of the rivers mentioned in the Junāgarh inscription of Rudradāman; see l. 5–6 सुवर्ण-सिकता-पलाशिनीप्रभृतीनां नदीनां; Fleet and others have taken सिकता-विलासिनी as an adjective of पलाशिनी. It is possibly the same as the river सुवर्णरेखा which flows at the foot of Girnār hill.
2. Read कान्ताश्चिर.
3. Ibid पुमान्
4. Fleet साम्भोनिधि
5. It is Fleet's restoration.
6. Fleet चेत्ता
7. Read विश्वे.
8. Ibid मैर्विबु—
9. Ibid. मानैर्भृ—

20. ग्रैष्मस्य मासस्य तु पूर्वं प [क्षे]
..................[प्र] थमे (ऽ) ह्नि सम्यक् ।
मासद्वयेनादरवान्स भूत्वा
धनस्य कृत्वा व्ययमप्रमेयम् । [।] [35]
आयामतो हस्तशतं समग्रं
विस्तारतः षष्टिरथापि चाष्टौ ।
21. उत्सेधतो (ऽ) न्यत् पुरुषाणि [सप्त]
...........[ह] स्तशतद्वयस्य । [।] [36]
बबन्ध यत्नान्महता नृदेवा
न [भ्यर्च्य] सम्यग्घटितोपलेन ।
अजातिदुष्टप्रथितं तटाकं
सुदर्शनं शाश्वतकल्पकालम् । [।] [37]
22. अपि च सुदृढ सेतु प्रान्तविन्यस्तशोभ
रथचरणसमाह्वक्रौंचहंसासधूतम् ।
विमल सलिल.....................
भुवि...............द [ने] (ऽ) र्कः शशी च । [।] [38]
23. नगरमपि च भूयाद्वृद्धिमत्पौरजुष्टं
द्विजबहुशतगीतब्रह्मनिर्नष्टपापं ।
शतमपि च समानामीति दुर्भिक्ष [मुक्तं]
.... [॥] [39]
[इति] सुदर्शनतटाकसंस्कारग्रन्थरचना समाप्ता ॥

Part II

24. दृप्तारिदर्पप्रणुदः पृथुश्रियः
स्ववङ्शकेतोः[1] सकलावनीपतेः ।
राजाधिराज्याद्भुत[2]पुण्य [कर्मणः]
.... [॥] [40]
....
.................................[।]
द्वीपस्य गोप्ता महतां च नेता
दण्डस्थि [ता] नां
25. द्विषतां दमाय । [।] [41]
तस्यात्मजेनात्मगुणान्वितेन
गोविन्दपादार्पितजीवितेन ।
....
........................[॥] [42]
......................र्घं

1. Read वंश. 2. Ibid राजाधिराजा—

विष्णोश्च पादकमले समवाप्य तत्र ।
अर्थव्ययेन

26. महता महता च काले
नात्मप्रभावनतपौरजनेन तेन । [।] [43]
चक्रं विभर्त्ति रिपु..............
.........................[।]
....

तस्य स्वतंत्रविधिकारणमानुषस्य । [।] [44]

27. कारितमवक्रमतिना चक्रभृतः चक्रपालितेन[1] गृहं ।
वर्षशते (ऽ) ष्टात्रिंशे गुप्तानां काल [क्रमगणिते [॥] [45]
....

.........................[।]
[स] ार्थमुत्थितमिवोर्जयतो (ऽ) चलस्य

28. कुर्वत्प्रभुत्वमिव भाति पुरस्य मूर्ध्नि ॥ [46]
अन्यच्च मूर्द्धनि सु............
.............................[।]
...............रुद्धविहंगमार्ग
विभ्राजते......................[॥] [47]

12. BHITARI STONE PILLAR INSCRIPTION OF SKANDAGUPTA

Prov. : Bhitari near Saidapur, Dist. Ghazipur. U. P.
Date : 455–67 A. D.
Lang. : Snskrit. **Scr.** : Northern Brāhmī.
Ref. : Fleet *C. I. I* III, Bhandarker. List. No. 1549. Jour. Beng. As. Soc. Vol. VI p. 1 ff.; *J, B. B. R. A. S.* Vol. X p. 59 ff. *J. B, B. R, A. S.* Vol. XVI p. 349 ff.

Text

[सिद्धम् ॥]

1. [सर्व्व] रा [जो] च्छेत्तुः पृथिव्यामप्रतिरथस्य चतुरुदधिसलिल [ा]
स्वादितयशसो धनदवरुणेन्द्र [ा] न्तकस [म स्य]

2. कृतान्तपरशोः न्यायागत [ा] नेकगोहिरण्य [को] टिप्रदस्य चिरो [त्स]
न्नाश्वमेधाहर्त्तुर्महाराजश्रीगुप्तप्रपौत्र [स्य]

1. Read भृतश्चक्र—

3. महाराजश्रीघटोत्कचपौत्रस्य महाराजाधिराजश्रीचन्द्रगुप्तपुत्रस्य लिच्छवि
दौहित्रस्य महादेव्यां कुम [ा] र [दे] व्या-
4. मुत्पन्नस्य महाराजाधिराजश्रीसमुद्रगुप्तस्य पुत्रस्तत्परिगृहीतो मह
देव्यान्दत्तदेव्यामुत्पन्नः[1] स्वयं चाप्रतिरथः
5. परमभागवतो महाराजाधिराजश्रीचन्द्रगुप्तस्तस्य पुत्रस्तत्पादानुद्ध्यातो
महादेव्यां ध्रुवदेव्यामुत्पन्नः परम-
6. भागवतो महाराजाधिर [ा] जश्रीकुमारगुप्तस्तस्य प्रथितपृथुमति
स्वभावशक्तेः
पृथुयशसः पृथिवीपतेः पृथुश्रीः [।]
7. पि [तृ] प [रि] गतपादपद्मवर्त्ती
प्रथितयशाः पृथिवीपतिः सुतो (ऽ) यम् [॥] [1]
जगति भु [ज] बलाड्यो[2] गुप्त वङ्शैक[3]वीरः
प्रथितविपुल
8. धामा नामतः स्कन्दगुप्तः [।]
सुचरितचरितानां येन वृत्तेन वृत्तं
न विहतममलात्मा तान [धीदा] विनीतः [॥] [2]
विनय
9. बलसुनीतैर्व्विक्रमेण क्रमेण
प्रतिदिनमभियोगादीप्सितं येन ल [ब्ध] ा [।]
स्वभिमतविजिगीषाप्रोद्यतानां परेषां
प्रणि
10. हित इव ले [भे [स] 'विधानोपदेशः [॥] [3]
विचलितकुललक्ष्मीस्तम्भनायोद्यतेन
क्षितितलशयनीये येन नीता त्रियामा [।]
समु
11. दित ब [ल] कोशा [न्पुष्यमित्रांश्च[4]] [जि] त्वा
क्षितिपचरणपीठे स्थापितो वामपादः [॥] [4]
प्रसभमनुप [मै] र्व्विध्वस्तशस्त्रप्रतापै
र्विन [य स] मु
12. [चितैश्च] क्षान्ति शौ [र्यै] र्न्निरूढम् [।]
चरितममलकीर्त्तेर्गीयते यस्य शुभ्रं
दिशि दिशि परितुष्टैराकुमारं मनुष्यैः [॥] [5]
पितरि दिवमुपे [ते]
विप्लुतां वङ्श[5] लक्ष्मीं
भुजबलविजितारिर्यः प्रतिष्ठाप्य भूयः [।]

---

1. Read महादेव्यां 2. Ibid. बलाढ्यो 3. Ibid वंशैक.
4. Some read 'युद्धयमित्रांश्च'. 5. Read वंश.

जितमिति परितोषान्मातरं सास्रनेत्रां
हतरिपुरिव कृष्णो देवकीमभ्युपे[1]

13. [त]: [॥][2] [6]

[स्वै] र्दं [ण्डैः]..................स्प्रचलितं वङ्शं प्रतिष्ठाप्य यो बाहु-
भ्यामवनिं विजित्य हि जितेष्वार्त्तेषु कृत्वा दयाम् [।] नोत्सिक्तो [न]
च विस्मितः प्रतिदिनं

14. संवर्द्धमानद्युतिः

गीतैश्च स्तुतिभिश्च वन्दकजनो यं [प्रा] पयत्यार्य्यताम् [॥] [7]
हूणैर्य्यस्य[3] समागतस्य समरे दोर्भ्यां धरा कंपिता भीमावर्त्तकरस्य

15. शत्रुषु शरा.........[।]

.....................विरचितं प्रख्यापितो [दीप्तिदा] न द्योति...नभीषु
लक्ष्यत इव श्रोत्रेषु गाङ्गध्वनिः [॥] [8]

16. [स्व] पितुः कीर्त्ति...........................[।]
....[॥] [9]

---

1. The absence of the name of the mother of Skandagupta coupled with the fact that "goddess of sovereignty, of her own accord, selected him as her husband" (लक्ष्मी स्वयं यं वरयाञ्चकार Junāgarh Rock Inscription of Skandagupta L. 5, v. 5, C. I. I. Vol III P. 50) is taken to mean that his mother was not a royal queen, that he had no legitimate claim to the throne, and that he cleared his way to the throne in a fatricidal war (For the orguments for this hypothesis see J. R. A. S. B. XVII 253 ff. and for criticism P. H. A. I. 5th ed. P. 572 ff.)
2. This verse is taken by some to refer to the fatricidal conflict in which Skandagupta came out victorious, betook himself, like Krishṇa to his weeping mother Devakī. But actually there is not the slightest reference to the fatricidal war ; as a matter of fact the antagonists expressly mentioned were outsiders "the Pushyamitras and the Huṇas" (P. H. A. In 8th dl. pp. 574–75)
3. Hūṇas, also known as Epthalites; Hiung-nu of the Chinese records were a Central Asian tribe; were known to the Indian politics in the days of Vikramāditya, as Kālidas refers to them. They were threatening with their cruel and barbarous atrocities N. W. India. This verse, though mutilated, refers to the severe struggles and victory in them, with the result that for nearly half a century the Gupta empire was immune from their depredations.

[कर्तव्या] प्रतिमा काचित्प्रतिमां तस्य शार्ङ्गिणः [।]
18. [सु] प्रतीतश्चकारेमां य [ा वदाचन्द्रतारकम्] [॥] [10.]
इह चैनं प्रतिष्ठाप्य सुप्रतिष्ठितशासनः [।]
ग्राममेनं स विद् [धे] पितुः पुण्याभिवृद्धये [॥] [11]
19. अतो भगवतो मूर्त्तिरियं यश्चात्र संस्थितः [।]
उभयं निर्द्दिदेशासौ पितुः पुण्याय पुण्यधीरिति [॥] [12]

13. SARNATH BUDDHIST STONE IMAGE INSCRIPTION OF KUMARGUPTA.

Prov. : Sārnath, Varanasi district. U. P.
Date : G. E. 154. (=473 A. D.).
Lang. : Sanskrt. ; **Scr.** : Northern Brāhmī
Ref. : *Arch. Serv. Ind. A. R.* p. 124. Sirkar, *S. I.* Vol. I. p. 320 ff.

Text

1. वर्षशते गुप्तानां[1] सचतुः[2]पञ्चाशदुत्तरे [।]
भूमिं रक्षति कुमारगुप्ते मासि-ज्येष्ठे द्वितीयायाम् ॥ [1]
2. भक्त्यावर्जितमनसा यतिना पूजार्थमभयमित्रेण [।]
प्रतिमाप्रतिमस्य गुणे [र] प [रे] यं [का] रिता शास्तुः ॥ [2]
3. मातापितृगुरुपू [र्व्वैं [3]] : पुण्येनानेन सत्वकायो (ऽ) यं [।]
लभतामभिमतमुपशम ❀ ❀ ❀ ❀ मृ[4] ॥ [3]

14. BHITARI SEAL OF KUMARGUPTA II OR III.

Prov. : Bhitari, near Saidpur, Ghazipur district. U. P.
Date : Fifth-six century (?)
Lang. : Sanskrit. **Scr.** : N. Brāhmī of the 5th–6th c. A. D.
Ref. : Fleet, *Ind. Ant.* XIX, (1890) p. 225. Hoernle, *A. S. B.* LVIII. Pt. i, p. 89. Sirkar. *S. I.* Vol. I. p. 321.

---

1. Some scholars identify this Kumārgupta with that of Bhitari Seal, and according to some he with Puragupta and Narasiṁhagupta represents a rival line, side by side one represented by Skandagupta and Budhagupta. These suggestions, though not impossible, are difficult to substantiate.
2. D. C. Sirkar is inclined to rectify the meter by reading सच्चतुः
3. D. S. Sahni पूर्व्वैः पूर्वं ancestors ; Gupte : पूर्त्तैः
4. Sirkar fills it as: o मुपशमं हित सुखं तदेव भवतु सत्त्वानाम् ?

Text

1. [सर्व्व] राजोच्छेत्तु ⤫ पृथिव्यामप्रतिरथस्य महाराजश्री [गुप्त] प्रपौ
[त्र] स्य महाराजश्रीघटोत्कचपौत्रस्य म [हा]
2. [राजा] धिर [ा] जश्रीचन्द्रगुप्तपुत्रस्य लिच्छ [वि दौहित्रस्य]
म [हादे] व्य [ां] [कुमा] रदेव्यामुत्पन्नस्य महाराजाधिराज
3. [श्री] समुद्रगुप्तस्य पुत्रस्तत्परि [गृही] तो म [हादेव्यान्दत्तदेव्या]
मुत्पन्नस्स्वयं च [ा][1] प्रतिरथ ⤫ परमभाग
4. [वतो] [महाराजा] धिराजश्रीचन्द्रगुप्तस्तस्य [पुत्र] स्तत्पाद [ा]
नु [द्धया] तो महादेव्य [ां] [ध्रु] वदेव्यामुत्पन्नो म [हा रा]
5. [जाधि] राजश्रीकुमार [गुप्त] स्तस्य पुत्रस्तत्पादानुद्धया [तो]
महादेव्यामनन्तदेव्यामुत्पन्नो महा [रा]
6. [जाधिरा] ज श्री [पुरगुप्त[2]] स्तस्य पुत्रस्तत्पादानुद्धय [ातो] मह
[ादेव्यां] श्रीचन्द्रदेव्यामुत्प[3] [न्नो] म [हा]
7. [राजाधिरा] जश्रीनरसिंहगुप्तस्तस्य[4] [पु] त्रस्त [त्प] ादा [नुद्धयातो]
मह [ादेव्यां] श्रीम [न्मित्र][5]
8. [देव्या] मु [त्प] न्न ⤫ परमभ [ा] गवतो मह [ाराजाधिरा] ज श्री
कुम [ा] र [गुप्तः ॥]

15. SARNATH BUDDHIST STONE IMAGE INSCRIPTION OF BUDHAGUPTA.

Prov. : Sārnath, Varanasi district. U. P.
Date : G. E. 157. (=436 and 476 A. D.)
Lang. : Snskrit **Scr.** : Northern Brāhmī
Ref. : Gupte : *Arch Surv. Ind. A. R.*, 1914–15 pp. 124–25.
Sirkar. S. I. Vol. I., p. 323.

---

1. Hoernle reads च प्रति रथ.
2. पुरगुप्त is perhaps identical with the king Vikramāditya of Śrāvasti, the father of बालादित्य, patron of वसुबन्धु, and a famons personage of Buddhist traditions (Watters, Yuan Chwang. I. P. 210 H).
3. Fleet वत्सदेवी. चंद्रदेवी is read also on Nalanda seal by N. P. Chakravarti (Ep. Ind. XXI P. 77 ; A. I. A. R. 1934-35 P. 63), and वैण्यदेवी by H. Śastri.
4. नरसिंहगुप्त, is known to have assumed the title बालादित्य (see. Allan op. cit. P. 137 f) He was, perhaps accordiing to Huen Tsang, contenporary of Mihirkula, and the builder of a Buddhist monastry in Nalandā. Dr. Raychaudhury identifies Huen Tsang's Bālāditya with Bhānugupta (P. H. A. pp. 596–7)
5. Fleet reads महा (लक्ष्मी) देव्या—

Text

1. गुप्तानां समतिक्रान्ते सप्तपञ्चाशदुत्तरे [।]
शते समानां पृथिवीं[1] बुधगुप्ते प्रशासति ॥ [1]
[वैशाखमाससप्तम्यां मूले श्यामगते [
2. मया [।]
कारिताभयमित्रेण प्रतिमा शाक्यभिक्षुणा ॥ [2]
इमामुद्दण्ड[2]सच्छत्रपद्मास [न विभूषितां ।]
[देवपुत्रवतो[3] दिव्यां]
3. चित्रवि [द्या] सचित्रितां ॥ [3]
यदत्र पुण्यं प्रतिमां कारयित्वा मया भृतम् [।]
माता [पित्रोर्गु] [रूणां च लोकस्य च समाप्तये ॥] [4]

16. DAMODARPUR COPPER PLATE INSCRIPTION OF THE TIME OF BUDHAGUPTA.

Prov. : Damodarpur, Dinājpur District. (Pakistan)
Date : G. E. 163 (=482 A. D.).
Lang. : Snskrit ; **Scr.** : N. E. Brāhmī.
Ref. : R. G. Basak *E. I.* Vol. XV p. 135 f. Sirkar. *S. I.* Vol. I. p. 324. ff.

Text

First Side

1. [सं १००] (+) [६०] (+) ३ आषाढ दि १० (+) ३ परमदैवत परमभट्टा [र] क महाराजाधिराजश्रीबुधगुप्ते [पृथि] वीपतौ तत्पाद [परि] गृहीते पुण्ड्र [व][4]
2. [र्द्धन] भुक्तावुपरिकमहाराजब्रह्मदत्ते संव्यवहरति [।] स्व [स्ति [।] पलाशवृन्दकात्सविश्वासं महत्तराद्यष्टकुलाधि [क]
3. [र] णग्रामिककुटुम्बिनश्च[5] चण्डग्रामके ब्राह्मणाद्यान्क्षुद्रप्रकृतिकुटुम्बिनः कुशलमुक्त्वानुदर्शयन्ति [यथैवं]

---

1. Sirkar changes it as समानां पृथिवीं शते for metrical difficulty.
2. Gupte reads इमामुद्धस्त.
3. Perhaps here is the reference to the Dhyānī Buddhas.
4. See supra.
5. Read कुटुम्बिनश्च.

4. [वि] ज्ञापयती नो[1] ग्रामिक[2]नाभको (ऽ) हमिच्छे[3] मातापित्रोस्स्व-
पुण्याप्यायनाय कदिचिद्ब्राह्मणार्य्यान्प्रतिवासयितुं

5. [तद्] हथ ग्रामानुक्रमविक्रयमर्य्यादया मत्तो हिरण्यमुपसंगृह्य समु-
दयवाह्याप्रद [खिल क्षेत्राणां]

6. [प्र] सादं कर्त्तुमति [4] [।] यतः पुस्तपालपत्रदासेनावधारितं युक्त-
मनेन विज्ञापितमस्त्ययं विक्रय-

7. मर्य्यादाप्रसङ्गस्तद्दीयतामस्य परमभट्टारकमहाराजपा [दे] न पुण्योपच-
यायेति [।] पुनरस्यैव

8. [पत्रदा] सस्यावधारणयावधृत्य नाभकहस्ताद्दीनार[द्वय][5]मुपसंगृह्य
स्थायपाल[6]कपिल श्रीभद्राभ्यायायक्र [स्य] च समुदय

Second Side

9. [वाह्याप्रद] [खि] लक्षेत्रस्य कुल्यवापमेकमस्य वायिग्रामकोत्तरपार्श्व-
स्यैव च सत्य मर्य्यादाया दक्षिणपश्चिमपूर्व्वेण

10. मह [त्त] राद्यधिकरणकुटुम्बिभिः[7] प्रत्यवेक्ष्याष्टकनवकनवकनलाभ्या-
मपविञ्छ्य चतुस्सीमोल्लिङ्ग्य[8] च नागदेवस्य

11. [दत्तं] [।] [तदु] त्तर कालं संव्यवहारिभिर्द्धर्म्ममवेक्ष्य प्रतिपाल-
नीयमुक्तञ्च[9] महर्षिभिः [।]
स्वदत्ताम्परदत्तां वा यो हरेत् वसुन्धरां ।

12. स [विष्ठा] यां कृमिर्भूत्वा पितृभिस्सह पच्यते [॥] [1]
बहुभिर्व्वसुधादत्ता राजभिस्सगरादिभिः [।]
यस्य यस्य यदा भूमिस्तस्य तस्य

13. तदा फलं [॥] [2]
षष्टिवर्षसहस्राणि स्वर्गे मोदति भूमिदः [।]
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेदिति ॥ [3]

---

1. Basak : विज्ञापयतीतो, but read—पयति
2. ग्रामिक was the headman of the village. According to Manu (VII. 115. 19) he was the king's representative in the village.
3. Read इच्छये
4. Ibid कर्तुमिति.
5. द्वय seemes to have been omitted at first but inscribed later at the bottom.
6. Read स्थानपाल
7. Read कुटुम्बिभिः
8. Basak—तुष्टिमो. Read सीमा उल्लिंग्य
9. Read—नीयम् । उक्तञ्च.

17. ERAN STONE PILLAR INSCRIPTION OF BUDHAGUPTA

Prov. : Sāgar district, Madhya Pradesh.
Date : G. E. 165 (=484 A. D.)
Lang. : Sanskrit **Scr.** : Northern Brāhmī
Ref. : Fleet *C. I. I.* III. p. 89. *Arch. Surv. Ind.* Vol. X p. 82. Sirkar. *S. I.* Vol. I. p. 326 ff.

Text

1. जयति विभुश्चतुर्भुजश्चतुरर्ण्णवविपुलसलिलपर्य्यङ्कः [।] जगतः स्थित्युत्पत्ति न्य [यादि][1]
2. हेतुर्ग्गरुडकेतुः [॥] [1] शते पञ्चषष्ट्यधिके वर्षाणां भूपतौ च बुधगुप्ते । आषाढ मास [शुक्ल]
3. [द्वा] दश्यां[2] सुरगुरोर्द्दिवसे । [।] [2] सं १०० (+) ६० (+) ५ [॥] कालिन्दीनर्म्मदयोर्म्मध्यं पाळयति लोकपालगुणै र्ज्जगति[3] महा [राज]
4. श्रियमनुभवति[4] सुरश्मि चन्द्रेच [।] [3] अस्यां संवत्सरमासदिवसपूर्व्वायां स्वकर्म्माभिरतस्य क्रतुयाजि [नः]
5. अधीतस्वाध्यायस्य विप्रर्षेर्म्मैत्रायणीयवृषभस्येन्द्रविष्णोः प्रपौत्रेण पितुर्गुणानुकारिणो वरुण [विष्णोः]
6. पौत्रेण पितरमनुजातस्य स्ववंशवृद्धिहेतोर्हरिविष्णोः पुत्रेणात्यन्तभगवद्भक्तेन विधातुरिच्छया स्वयंवरयेव र [ा] ज
7. लक्ष्म्याधिगतेन चतुःसमुद्रपर्य्यन्तप्रथितयशसा अक्षीणमानधनेनानेकशत्रुसमरजिष्णुना महाराजमातृविष्णुन [ा]
8. तस्यैवानुजेन तदनुविधायिन [ा] तत्प्रसादपरिगृ[ही]तेन धन्यविष्णुना च । मातृपित्रोः[5] पुण्याप्यायनार्थमेष भगवतः ।
9. पुण्यजनार्द्दनस्य जनार्द्दनस्य ध्वजस्तम्भो (ऽ) भ्युच्छ्रितः [।] स्वस्त्यस्तु गोब्राह्मण- [पु] रोगाभ्यः सर्व्वप्रजाभ्य इति । [।]

---

1. This is suggested for the first time by Dr. Hall, adopted by Fleet, and accepted by D. C. Sirkar.
2. Prinsep reads त्रयोदश्यांम् which is unacceptable for metrical difficulty.
3. Sirkar : गुणैः ।जगति.
4. Fleet wants to supply तीर्थौ after पूर्व्वायाँ
5. Sirkar. माता पित्रोः.

18. DAMODARPUR COPPER PLATE INSCRIPTION OF THE TIME OF BUDHAGUPTA.

Prov. : Damodarpur, Dinajpur district, Pakistan.

Date : (C. 476—94–95 A. D.)

Lang. : Sanskrit. **Scr.** : North E. Brāhmī.

Ref. : Basak. *E. I.* XV. p. 138 f. Sirkar. *S. I.* Vol. I, 328 ff.

Text

First Side

1. ... ...फाल्गुन दि १० (+) [५] परमदैवतपरमभट्टारकमहाराजा-
धिराज श्री बुधगु[1] [प्ते] [पृथिवी][2]-
2. [पतौ] [त] त्पादपरिगृहीतस्य पुण्ड्रवर्द्धनभुक्तावुपरिकमहाराजजय-
दत्तस्य भोगेनानु [वहमा]
3. नके [को] टि [वर्ष] विषये च तन्नियुक्तकेहायुक्तक[3]शण्डके[4] अधिष्ठा-
नाधि करण [ं] नगरश्रेष्ठिरिभु[5]
4. पा [ल] सार्त्थवाहवसुमित्रप्रथमकुलिकवरदत्तप्रथमकायस्थविप्रपालपुरोगे
च स [म्व्य[6]] वहरति
5. अनेन श्रेष्ठिरिभुपालेन विज्ञापितं हिमवच्छिखरे कोकामुखस्वामिनः
चत्वारः कुल्यवापाः [श्वे] तव-
6. राहस्वामिनो (ऽ) पि सप्त कुल्यवापाः अस्मत्फलाशन्सिनो[7] पुन्याभि-
वृद्धये डोङ्गाग्रापे[8] पूर्वं मया
7. अप्रदा अति[9]सृष्टकास्तदहन्तत्क्षेत्रसामीप्यभूमौ तयोराद्यकोकामुखस्वामि-
श्वेतवराह
8. स्वामिनोर्ना [म] लिङ्गमेकं देवकुलद्वयमेतत्कोष्ठिकाद्वयञ्च कारयितुमिच्छा-
म्यहँथ वास्तुना
9. सह [कुल्य] वापान्यथाक्रयमर्य्यादया दातुमिति [।] यतः पुस्तपाल-
विष्णुदत्तविजय [नन्दि] स्थानु[10]-
10. नन्दिनामवधारणयावधृतमस्त्यनेन हिमवच्छिखरे तयोः कोकामुखस्वामि-
श्वेतवरा [ह] स्वामि [नोः]

---

1. Read बुध. This is suggested by Dr. Basak.
2. This is Basakś restoration.
3. Read इहायु.
4. It may possibly be गण्डक.
5. Sirkar ऋभु.
6. Ibid संव्य
7. Ibid शंसिना पुण्या.
8. Ibid ग्रामे.
9. Sirkar suggests सृष्टका तद.
10. Ibid स्थाणु.

11. अप्रदाक्षेत्रकुल्यवापा एकादश दत्तकास्तदर्थञ्चेह देवकुलकोष्ठिकाकरणे युक्त [मे] त [द्विशा]
12. [पितं] [क] मेण तत्क्षेत्रसामीप्यभूमौ वास्तु दातुमित्यनुवृत्त त्रिदीनारिक्यकु [ल्य वा] प विक्रय [मर्य्या] द

Second Side

13. [या]··· ··· ···
14. ··· ···पु [ष्करि] णी पू [र्व्वेण] रिभु [पा] ल पु [ष्करिणी] [दक्षिणेन]
15. ··· ··· ···दत्ताः [।] [त] दुत्तरकालं [सं] व्यवहारिभिर्द्देवभ-[क्त्या] नु मन्तव्या[1] [उक्तं] व्यासेन [।]
स्वदत्तां परदत्ता
16. [म्वा[2] यो हरेत्] वसुन्धराम् [।]
स विष्टा [यां] क्रिमि[3]र्भूत्वा पि [तृ] भिस्स [ह पच्यते] [।] [1]
पूर्व्वदत्तां द्विजातिभ्यो
17. [यत्नाद्रक्ष यु] धिष्ठिर [।]
महीं [महीमतां] श्रेष्ठ दा [नाच्छ्रेयो (ऽ) नुपालनं][4] [॥] [२]
[बहु] भिर्व्वसु [धा द] त्ता
18. [राजभिश्च] पुनः पुनः [।]
[य] स्य [य] स्य यदा भूमि [स्तस्य तस्य] त [दा] फलमिति[5] [॥] [3]

19. ERAN STONE PILLAR INSCRIPTION OF THE TIME OF BHANUGUPTA.

Prov. : Eran, Sagar district, Madhya Pradesh.
Date : G. E. (191 = 510 A. D.)
Lang. : Sanskrit **Scr.** : Northern Brāhmī
Ref. : Fleet *C. I. I.* III. p. 92 ff. Sirkar. *S. I.* Vol. I. pp. 335–36.

Text

1. ॐ[6] [॥] संवत्सर शते एकनवत्युत्तरे श्रावणबहुलपक्षस [प्त] म्य [ां] [।]

---

1. Sankar Read मन्तव्याः उक्तं.
2. Ibid त्तां वा.
3. Ibid कृमिर्भूत्वा.
4. Ibid नम्.
5. Ibid फलम् ॥ इति ॥
6. Fleet ओं ; Sirkar सिद्धं expressed by a symbol.

2. संवत् १०० (+) ९० (+) १ श्रावण ब दि ७ ॥
   ❀ ❀ कल[1] वङ्शादुत्पन्नो[2] ❀ ❀ ❀ ❀
3. राजेति विश्रुतः [।]
   तस्य पुत्रो (ऽ) तिविक्रान्तो नाम्ना राजाथ माधवः ॥ [1]
   गोपराज [:]
4. सुतस्तस्य श्रीमान्विख्यातपौरुषः [।]
   शरभराज दौहित्रः स्ववङ्शतिलको[3] (ऽ) धुना [॥] [2]
5. श्री भानुगुप्तो जगति प्रवीरो
   राजा महान्पार्थसमो (ऽ) तिशूरः [।]
   तेनाथ सार्द्धन्त्विह गोपर [ाजो]
6. मित्रानु [गत्येन] किलानुयातः ॥ [3]
   कृत्वा (च) [यु] द्धं सुमहत्प्रक [ा] शं
   स्वर्गं गतो दिव्य न [रे] [न्द्र कल्पः] [।]
7. भक्तानुरक्ता च[4] प्रिया च कान्ता
   भ [ार्य्याव] ल [ग्न] ानुगता [ग्नि] र [ा] शिम् ॥ [4]

20. KHOH COPPER PLATE OF SAṀKSHOBHA.

Prov. : Khoh, Nagoda State, Madhya Pradesh.
Date : G. E. 209 (=529 A. D.):
Lang. : Sanskrit **Scr.** : N. Brāhmī
Ref. : Fleet. *C. I. I.* III. p. 114 f. Sirkar. *S. I.* pp. 374. ff.

Text

First Plate

1. ॐ [॥] नमो भगवते वासुदेवाय [॥] स्वस्ति [॥] नवोत्तरे (ऽ) ब्द[5]शतद्वये गुप्तनृपर [ा] ज्यभुक्तौ
2. श्रीमति प्रवर्द्धमानविजयराज्ये महाश्वयुजम [ं] वत्सरे चैत्रमासशुक्ल
3. पक्षत्रयोदश्य [ा] मस्यां संवत्सर[6]मासदिवसपूर्व्वायां [ं] [।] चतुर्दश-
   विद्यास्थान विदि-

1. Ibid प्रशुक्ल 2. Sirkar वंश— 3. Ibid स्ववंश
4. According to Fleet this meter has become faulty by the lengthening of च influenced by प्रि ofter it. But this is inacceptable because of the grammatical rule वर्णसंयोगपूर्व्वश्च by which vowels may be short before प्र, द्र and ह्र as also ब्र.
5. Read—ब्द. 6. Ibid संवत्सर.

4. तपरमार्थस्य कपिलस्यव[1] महर्षेः सर्व्वतत्वज्ञस्य[2] भरद्वाजसगोत्रस्य नृपि
5. पि[3]परिव्राजकसुशर्म्मणः कुलोत्पन्नेन महाराजश्रीदेवाढ्यपुत्रप्रनप्त्रा महारा-
6. जश्रीप्रभञ्जनप्रनप्त्वा महाराजश्रीदामोदरनप्त्वा गोसहस्रहस्त्यश्वहिरण्यानेक-
7. भूमिप्रदस्य गुरुपितृमातृपूजातत्परस्यात्यन्तदेवब्राह्मण[4]भक्तस्यानेकसमर-
8. शतविजयिनः साष्टादशाटवीराज्याभ्यन्तरं डभाला राज्यमन्वयागतं समडि-
9. पालयिष्णोरनेक[5]गुणविख्यातयशसो महाराजश्री[6]हस्तिनः सुतेन
10. वर्ण्णाश्रमधर्म्मस्थापनानिरतेन परमभागवतेनात्यन्तपितृभक्तेन स्ववं-
11. शामोदकरेण महाराजश्रीसंक्षोभेन[7] मातापित्रोरात्मनश्च पुण्याभि
12. विर्द्धये[8] छोड्डुगोमिविज्ञाप्त्या तमेव च स्वग्ग[9]सोपानपंक्तिमारोपय-

Second Plate

13. ता भगवत्याः पिष्टपुर्य्याः कारितकदेवकुले वलि[10]चरुसत्रोपयो
14. गार्थं खण्डस्फुटितसंस्कारार्थञ्च मणिनागपेठे ओपाणिग्राम-
15. स्यार्द्धं चोरद्रोहकवर्ज्जं[11] ताम्र शासनेनातिसृष्टं [।] तदस्मत्कुलोत्थौः[12]म-
16. त्पादपिण्डोपजीविभिर्व्वा कालान्तरेष्वपि न व्याघातः कार्य्यः [।] एवमाज्ञा
17. स[13] यो (ऽ) न्यथा कुर्यात्तमहं देहान्तरगतो (ऽ) पिमहतावध्यानेन निर्द्दहेयं [॥]
18. उक्तं च भगवता परमर्षिणा वेदव्यासेन व्यासेनः[14] [।]
पूर्व्वदत्तां द्विजातिभ्यो
19. यत्नाद्रक्ष युधिष्ठिरः [।]
महीम्महिमता (ं) श्रेष्ठ दानाच्छ्रेयो (ऽ) नुपालनः[15] [॥] [1]
वहुभिः[16]
20. वसुधा भुक्ता राजभिस्सगरादिभिः [।]
यस्य यस्य यदा भूमिस्तस्य तस्य तदा
21. फलं [॥] [2]
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः [।]
आच्छेत्ता चानुमन्ता च तान्ये
22. व नरके वसेत् [॥] [3]
भूमि प्रदानान्ना[17] परं प्रदानं
दानाद्विशिष्टं परिपालनञ्छ[18] [।]

---

1. Ibid कपिलस्येव. 2. Ibid तत्व. 3. Ibid नृपति.
4. Ibid त्रा— 5. Ibid समधिपालयिष्णो. 6. Ibie श्री॰
7. Ibid श्री संक्षोभेण. 8. Ibid वृद्धये. 9. Ihid स्वर्ग्ग.
10. Read बलि. 11. Ibid वर्ज्जं, 12. Ibid लोत्थैः
13. Ibid शसे. 14. Ibid व्यासेन. 15. Ibid पालनम्—
16. Ibid वहुभिर्व्वसुधा. 17. Idid प्रदानान्न. 18. Ibid पालनञ्च.

23. सर्वे (ऽ) तिसृष्टा (ं) परिपाल्य भूमि (ं)
नृपा नृगाद्यास्त्रिदिवं प्रपन्नाः ॥ [4]
लिखितंश्च[1]

24. जीवितनप्त्रा भुजङ्गदासपुत्रेश्वरीदासेनेति [।] स्वमुखाज्ञा [।]
चैत्र दि २० (+) ८ [।]

21. BASIM COPPER PLATE INSCRIPTION OF VINDHYAŚAKTI II.

Prov. : Basim District. **Date** : Regnal year 37.

Lang. : Sanskrit and Prakrit.

Scr. : Southern Brāhmī of the Box headed variety of the fourth century A. D.

Ref. : (1) D. B. Mahajan and Y. K. Deshpande, *Proc. Ind. Hist. Cong.* Calcutta 1939. p. 349 ff.
(2) D. C. Sirkar. *Ind. H. Q.* XVI. p. 182 ff; XVII p. 110. ff; *S. I.* Vol. I. p. 406.

Text

First Plate

[दृष्टम्] [॥]
सिद्धम् [॥]

1. वत्सगुल्माद्धर्म्ममहाराजस्य [ा] ग्निष्टोम [ा] सोर्य्यामवाजपेयज्यो [ति]-
2. [ष्टो] मबृहस्पतिसवसाद्यस्कचतुरश्वमेधयाजिनस्सम्राज (:) वृ-
3. ष्णिवृद्धसगोत्रस्य हारितीपुत्रस्य श्र [ी] प्रवरसेन पौत्रस्य
4. धर्म्ममहार (ा) जस्य श्रीसर्व्वसेनपुत्रस्य धर्म्ममह [ा] राजस्य
5. वाकाटकाना [म्] श्रि[2]विन्ध्यशक्तेर्व्वचनात् नान्दीकडस उत्तरम [ग्गे]

Second Plate, First Side

6. भाकालक्खोप्पकाब्भासे आकाशपद्देसु अ [म्ह] सन्तका सात्वा (द्धक्ख नि) योगनि-
7. युत्ता आणत्तिभडा सेसायसाञ्चरन्तरलपुत्ता[3] भाणितव्वा [।] आम्हेहि
8. दाणि आपुणो विजयवेजयिके आयुबलवद्धणिके [स्व] स्ति-

1. Ibid लिखितश्च. 2. Read श्री विन्ध्य. 3. Sirkar कुलपुत्ता.

9. शान्तिवाचने इहामुत्तिके धाम्मत्थाणे एत्थङ्गामे आधिव्वणिकचर
10. णस्स आढ्क । भालन्दायण सगोत्तेसि [सि] तुज्जेसि कापिञ्जल

Second Plate, Second Side

11. सगोत्तेसि । रुद्दज्जेसि । आविष्ठायणसगोत्तेसि । भाट्टिदेवज्जेसि
12. कोसि [क] सगोत्तेसि । देसुजेसि । कोसिकसगोत्तेसि । वेण्हुज्जेसि ।
13. कोसीकसगोत्तेसि । विधिज्जेसि । पैत्पलादिसगोत्तेसि पितु-
14. जेसि भालन्दायणसगोत्तेसि चान्दजेसि कोसिकसगोत्तेसि जेट्ठजे-
15. सि । पडेहि दोहिं भालन्दायणसगोत्तेसि बुद्धजेसि कोसिकसगोत्तेसि

Third Plate, First Side

16. भाद्दिलज्जेसि । कोसिकसगोत्तेसि । सिवज्जेसि । कोसिकसगोत्तेसि
17. हरिण्णजेसित्ति एताण बाम्हणाण भागा ति [णि] ३ कोसिकसगोत्ते [सि]
18. रेवतिजेसि । भागो । चउत्थोत्ति आचन्दादिच्चकालको अपुव्व द-
19. त्तिय दत्तो । [।] पुव्वरायणुमते यसे चातुव्वेज्जगामभजात [।] परिहारे वित-
20. राम [।] तजथा अरट्ठसंविणेयिक । अलवण [क्ले] णखातक । अ हिरण्ण धा [ण्ण]-

Third Plate : Second Side

21. प्पणयप्पदेय । अपुप्फक्खीरग्गहणि । अपारम्परगोबलिवद्द
22. अवारसिद्धिक । अचम्मङ्गालक । अभडप्पावेस । अखट्टाचोल्लकवेणे-
23. सिक । अकरद । अवह । सनिधिं । सोपनिधि । सकुतुप्पान्त ।
24. समञ्ञमहाकरण । साव्वजातिपरिहारपरिहितञ्ञ [।] जतो उपरिलि-
25. खित । शासणवादप्पमाण करेत्ता रक्खध रक्खापेधय परिहरध

Fourth Plate

26. परिहरापेधय [।] जो बु [आ] बाधं करेज्ज कतव्व [अ] नुव [म] ण्ण [ति]
27. तिस्स [ए] तेहि । उपरिलिखितेहि । बाम्हणेहि । परिजपिते स [द] ण्ड-
28. निग्रह करेज्जामेत्ति [।] साव्वच्छरं ३० (+) ७ हेमन्तपक्खं पढम
29. [दि] व [स] ५ [।] स सुहाण्णत्थि [।] लीखितमिमं शासनं सेण-पतिणा
30. वण्हुण[1] इति ॥ सिद्धिरस्तु ॥

---

1. वेंण्हु—

22. POONA COPPER PLATE OF PRABHĀVATIGUPTĀ

Prov. : Poona district, Bombay.
Date : Regnal year 13. **Lang.** : Snskrit.
Scr. : Southern Brāhmī of the Nailheaded variety.
Ref. : K. N. Dikshit and K. B. Pathak, *Ep. Ind.* Vol. XV p. 416.

Text

Seal.

वाकाटक ललामस्य
[क्र] म प्राप्त नृपश्रिय (:) [।]
जनन्या युवराजस्य
शासनं रिपु शास [न] (ॱ) [॥] [1]

First Plate,

दृष्टम् [॥]

1. सिद्धम् [॥] जितं भगवता [।] स्वस्ति नान्दिवर्द्धनादासीद्गुप्तादि रा [जो] [म] ह [ाराज]
2. श्रीघटोत्कचस्तस्य सत्पुत्रो महाराज श्रीचन्द्रगुप्तस्तस्य सत्पुत्रो
3. (ऽ) नेकाश्वमेधयाजी लिच्छविदोहित्रो महादेव्यां कुमारदेव्यामुत्पन्नो
4. महाराजाधिराज श्रीसमुद्रगुप्तस्तत्पत्पुत्रस्तत्पाद[1] परिगृहीतः
5. पृथिव्यामप्रतिरथस्सर्व्वराजोच्छेत्ता चतुरुदधि सलिस्वादित[2]
6. यशानेकगोहिरण्य कोटी[3] सहस्रप्रद ⨯ परमभागवतो महारा
7. जाधिराज श्रीचन्द्रगुप्तस्तस्य दुहिता धारणसगोत्रा नाग कुल सम्भू
8. ताया (ॱ) श्रीमहादेव्या (ॱ) कुबेरनागायामुत्पन्नोभयकुलालंङ्कार भूतात्यन्त भगवद्भक्ता
9. वाकाटकानां महाराज श्रीरुद्रसेनस्याग्रमहिषी युवराज
10. श्रीदिवाकरसेन जननी श्रीप्रभावतिगुप्ता सुप्रतिष्ठाहारे

Second Plate.

11. विलवणकस्य पूर्वपार्श्वे शीर्षग्रामस्य दक्षिणपार्श्वे कदापिञ्जनस्यापरपार्श्वे
12. सिदिविवरकस्योत्तरपार्श्वे उङ्कुणग्रामे ब्राह्मणाद्यान्ग्राम कुटुम्बिन ⨯ कुशल
13. मुक्त्वा समाज्ञापयति [।] विदितमस्तु वो यथैष ग्रामो (ऽ) स्माभि स्व पुरायाप्यायना [र्थं]

---

1. Read सत्पुत्र
2. Ibid. सलिलास्वादित
3. Ibid. कोटि—

14. कार्त्तिक शुक्ल द्वादश्या (ं) भगवत्पाद मूले निवेद्य भगवद्भक्ताचार्य्य चनालस्वामिने (ऽ) पूर्व्व
15. दत्या उदक पूर्व्वमतिसृष्टो यतो भवाद्भिरुचितमर्य्यादया[1] सर्व्वाज्ञा× कर्त्तव्या (:) [।] पूर्व्व
16. राज्ञानुमता[2] [ं] अत्र चातुर्विद्याग्रहार परीहारान्वितरामस्तथथा[3] भट छत्र प्रावेश्यः
17. अ चारासन चर्म्माङ्गार क्रिराव केण्वि खानक [:] अ पा (र) म्पर (:) अ [पशु] मेध्यः अ पुष्प क्षीरसन्दोहः
18. स निधिस्सोपनिधिस्स कृतोपकॢप्तः[4] [।] नदेष भविष्यद्राजि[5] भिस्संर-क्षितव्य (:) परिवर्द्ध
19. यितव्यश्च [।] यश्चास्मच्छासनमगणयमानस्स्वल्पामप्य बाधा (ं) कुर्य्यात्कारयीत[6] वा
20. तस्य ब्राह्मणरावेदितस्य[7] स दण्ड निग्रहं कुर्य्याम [।] व्यास गितश्चात्र[8] श्लोको भवति [।]
21. स्व दत्ताम्पर दत्ता (ं) वा यो हरेत वसुन्धरां [।]
गवा [ं] शत सहस्रस्य हन्तुर्हरति दुष्कृतम् [॥] [2]
22. संवत्सरे च त्रयोदशमे[9] लिखितमिद (ं) शासनम[10] [।]
चक्कदासेनोत्कट्टितम् [॥]

23. AJAṆṬĀ CAVE INSCRIPTION OF THE TIME OF HARIṢEṆA

Prov. : Ajantā (written Ajanthā and pronounced as Ajanta by the local Marāthis. Ourangabad district, Maharashtra.)

Date : C. 6th. Century A. D. **Lang.** : Sanskrit.;

Scr. : Southern Brāhmī of the box-headed variety.

Ref. : Burgess and Bühler, *Arch. Serv. Ind.* IV p. 124. ff. *A. C.* Biswas, *Ind. Culture* VII. p. 372 ff. Bhagwan Lal Indraji, *Inscriptons from the Cave Temples of India*, p. 69.

---

1. Read भवद्भिः
2. Ibid राजानुमता
3. Ibid रामः ! तद्यथाभटच्छा—
4. Ibid क्लृप्तोपक्लृप्तः । तदेष ।
5. Ibid राजभिः
6. Ibid कारयेत
7. Ibid ब्राह्मणैः
8. Ibid गीतश्च
9. Ibid त्रयोदशे
10. शासनम्

Text

1. उद्दीर्ण्णं लोकत्रय दोषवह्नि
निर्व्वापणो.................[।]
.........[बुद्धम] भिप्रणम्य
पूर्व्वां प्रवक्ष्ये क्षितिपानुपूर्व्वी [म्] [1]

2. महाविमर्द्देष्वभिवृद्धशक्तिः
क्रुद्धस्सुरैरप्यनिवार्य्य [शक्तिः] [।]
[अनन्यसाधा] रण दान शक्तिः
द्विज ᳵ प्रकाशो भुवि विन्ध्यश [क्तिः] [॥] [2]

3. पुरन्दरोपेन्द्र सम प्रभावः
स्वबाहुवीर्य्या [र्ज्जि] त [सर्व्वलोकः] [।]
......................[यशों] शुकानां
बभूव वाकाटक वंशके [तुः] [॥] [3]

4. रणे [स्व] हय्युत्थित रेणु जाल
सञ्छादितार्क्क................. [।]
[प्रनष्टसारानखिला] नराती
न्कृत्वाभिवाद प्रवणा [˙] श्चकार [॥] [4]

5. [विनि] [र्ज्जि] तारि [स्सुर] राजकार्य्यं
श्चकार पुण्येषु परं प्रय [त्नम्] [।]
....
.... [॥] [5]
[अरि] नरेन्द्र मौल्लि विन्यस्त मणि किरणलीढ [क्रमाम्बुजः] [।]

6. प्रवरसेनस्तस्य पुत्रो (ऽ) भूद्विकसन्नवेन्दीवरेक्षणः [॥] [6]
रविमयूख द ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ [।]
[सर्व्वसेनः] प्रवरसेनस्य जित सर्व्वसेनस्सुतो [ऽ] भवत् [॥] [7]

7 [तस्य] पुत्रः पार्त्थिवेन्द्रस्य प्रश [शा] स धर्म्मेण मेदिनी [म्] [।]
कुन्तलेन्द्र [˙] नि [र्जित्य श्री] [पृ] थिवी [षेणो] [नयवांस्तदा] [॥] [8]
प्रवरसे [नस्त] स्य पुत्रो [ऽ] (भू)
त्प्रवरोर्ज्जितोदार शासन
ᳵ प्रवर

8. ....
.... [॥] [9]
[तस्यात्मज × कामतः]......
..........................[।]
...........[म] वाप्य राज्य
मष्टाब्दको य ᳵ प्रशशास सम्य [क्] [॥] [10]

9. [त] स्या [त्मजो] (ऽ) भून्नरदेव [कल्पो]
[गुणैरतुल्यो] भुवि देवसेनः [।]
यस्योपभोगैर्ल्ललितैर्व्वि [चित्रै]
[नृं] देवराजस्य············भूः [॥] [11]
पुण्यानुभावात्क्षितिपस्य [तस्य]

10. ································[।]
·········[न्या] य गुणाधिवासो
[प्रवृद्ध] कोशो भुवि हस्तिभोजः [॥] [12]
प्र··············· ⨯ पृथुपीनवक्षा
स्सरोरुहाक्ष ⨯ क्षपि

11. [तारिपक्षः] [।]
······························ब [द्दु]
र्द्दिग्गन्धहस्तिप्रतिमो बभूव [॥] [13]
हितो विनीतः प्रणय [प्रसिक्तो]
[म] नोनुकूलो (ऽ) नुविधानव [र्त्ती] [।]
[नि] रत्यय

12. ···················
·································कश्च [॥] [14]
त [थै] व लोक सुहिताशयत्वा
त्सुखेन सम्य [क्प] रिपालनेन [।]
[पितेव] मातेव सखेव नित्यं
प्रियो (ऽ) थिगम्यश्च बभूव

13. [मोहा] [॥] [15]
····································
···································· [तुल्यम्र] [।]
स्वस्थस्समावेश्य स तत्र राजा
[सम] ज्ञ भोगेषु यथेष्ट चेष्टः [॥] [16]
अथ तस्य सुतो बभू

14. [व राजा]
································ [नीतिः] [।]
हरि राम हर स्मरे [न्दु] कान्ति
र्हरिषेणो हरि विक्रम प्रतापः [॥] [17]
स कुन्तलावन्ति कलिङ्ग कोसल
त्रिकूट लाटान्ध्र

15. ···············
································नैर्घृता-
नपि स्वनिर्देश··············· [॥] [18]

प्रथितो भुवि हस्तिभोज सूनु
स्सचिवस्तस्य महीपतेर्ब्बभूव [।]
सकल क्षिति

16. ....
.... [॥] [19]
.... ज्येष्ठ स्थिर धीर चेता
स्त्याग क्षमौदार्य्य गुणैरुपेत (:) [।]
धर्म्मेण धर्म्मप्रवणश्शशास
देशं यश ≍ पुरायगुणांशु

17. [दीप्तम्] [॥] [20]
....
प्रति पुण्योपचयं परं चकार [।]
यत ऊद्ध्वमद [स्सहायधर्म्मा]
[परितो लोकगुरौ] चकार कारा [न्] [॥] [21]
आयुर्व्वयो वित्त सखाणि

18. ....
.... लानि [।]
उ [द्दिश्य] मातापितरावुदारं
न्यवी विशद्वेश्म यतीन्द्र [सेव्यम्] [॥] [22]
सजलाम्बुद [वृन्द संस्थि] ताग्रे
भुजगेन्द्राद्ध्युषिते महीधरेन्द्रे [।]

19. ....
.... श्रीपतिन? शरा निकुञ्जे [॥] [23]
गवाक्ष निर्य्यूह सुवीथि वेदिका
[सु] रेन्द्र कन्या प्रतिमाद्यलङ्कृतम् [।]
मनोहरस्तम्भविभङ्ग

20. [मेदुरं]
.... र चैत्यमन्दिर [˙] [॥] [24]
म............तल सन्निविष्ट
वि [तान] ....मनो [भि] रामं [।]
...............श्चाम्बु महानिधान [˙]
नागेन्द्र वेश्मादिभिर

21. .... [॥] [25]
[कल्पार्हं तु] सम [मी] रणा.........
.... [।]
ग्रीष्मार्कस्य च किरणोपता [प] त [प्तं]
सर्व्वर्त्तु प्रपित सुखोपभोगयोग [म्] [॥] [26]

22. .... [सु] रेन्द्रमन्दिराणा [ं]
रुचिम [न्म] न्दर कन्द............ [।]
....

.... [मुखं] यथेप्सित [श्च] [॥] [27]
असम [व्यति] रोचने गिरेर्व्वि
क

23. .... [काननानि] [।]
वह............................
.... [॥] [28]
..................यस्य जनेन नाम
प्रीति प्रसाद विकच प्रणयेन चक्रे [।]
[एतच्च]

24. ....लयनं सुरेन्द्र
मौलि [प्रभोपचित] ....हाय [॥] [29]
निवेद्य सङ्घाय............ [भोग्यं]
सबन्धुवर्गस्स वराहदेवः [।]
नृदेव सौख्यान्यनुभूय

25. ....

[शरराय] शास्ता सुगत (:) प्रशस्तः [॥] [30]
सान्द्राम्भोद भुजङ्गभोग.................
............न्न मनश्शिलाल कपिलैर्य्यात्रकरैर्भास्व (स्क) रः [।]
तावच्छे

26. ....स्सेव्यतां
मन्तर्म्मण्डप (ल १) रत्न [मे] तदमलं रत्नत्र [योद्भा] वित [ं] [॥] [31]
विविध लयन सानुस्सेव्यमानो महद्भि
र्गिरेरय

27. ....ज्र्यः [।]
जगदपि च समस्तव्यस्त दोष प्रहाणा
[द्वि] शतु पदमशोकं निर्ज्वरं शान्तमार्यं [ं] [॥] [32]

24. INDORE PLATES OF PRAVARASENA II

Prov. : Indore

Date : Regnal year 23. **Lang.** : Sanskrit.

Scr. : Southern Brāhmī of box-headed variety of C. 5th century A. D.

Ref. : S. K. Bose, *Ep. Ind.* XXIV. p. 50 ff.

Text

Second Plate : First Side.

1. द [ै] हित्रस्य गौतमीपुत्रस्य पुत्रस्य वाकाटक [ा] नाम्महार (रा) ज श्रीरुद्रसेनस्य सूनो [:]
2. अत्यन्तम (मा) हेश्वरस्य सत्यार्ज्जवकारुरायशौर्य्यविक्रमनयविनय-माहात्म्य—
3. धिमत्वपात्रगतभक्तित्वधर्म्मविजयित्वमनोनैर्म्मल्यादिगुणसमुदितस्य[1]
4. वर्षशतमभ (भि) वर्द्धमानकोशदण्डसाधनसन्तानपुत्रपौत्रिण [:] युधि-ष्ठिर—
5. वृत्तेर्वाकाटकाना [म्] महाराज श्रीप्रि (पृ) थिविषेणस्य सूण (नो) : भगवत्श्चक्रपाणे [:]
6. प्रसादोपार्जितश्रीसमुदयस्य वाकाटकाना [म्) महाराजश्रीरुद्रसेन—

Second Plate : Second Side.

7. स्य सूनो [:] महाराजाधिराज श्रि (श्री) देवगुप्त सुताया [ं] प्रभावतिगुप्तायामुत्पन्न—
8. स्य वाकाटकानाम्महाराजश्रीप्रवरसेनस्य वचना [त् ।] गेपुरकमार्ग्गे अस्म—
9. त्सन्तिकारसर्व्वाद्ध्यक्षनियोगनियुक्ता[2] आज्ञासंचारिकुलपुत्राधिकृता भटो— ़ •
10. श्छात्राश्च[3] श्युषितपूर्व्वमयाज्ञयाज्ञापयितव्या[4] [: ।] विदितमस्तु वः
11. यवेहास्माभिरात्मनो[5] ध्धर्म्मायुर्व्बलश्वर्य्यविवृद्धिय[6] इहामुत्रहितार्त्थं
12. वैजयिके धर्म्मस्थाने आरामकस्य उत्तरपार्श्वे कोविदारिकाया [:] पूर्व्व—
13. पार्श्वे मल दतामिति[7]

Third Plate : First Side.

14. कोशम्बकस्य दक्षिण प [ा,] श्वं [`] अंजणव [ा] टकस्य अपरपार्श्वे विशाखार्य्य वाटक—
15. स्य [आ] रामक व [ा] स्तव्य वाजिकौशिक सगोत्र विशाखार्य्यपुत्र-गोराडा—
16. र्य्याय गोराड [ा] र्य्य पुत्र मन [ो) रथार्य्याय गोवार्य्याय देवार्य्याय
17. बाप्पार्य्याय च कुमारार्य्याय द्रोणार्य्याय च पू [`] व्व दत्ता इति कृत्वा
18. यतोस्म (स्मा) भि [:] शासननिबन्धम्कृतः[8] अपूर्व्वदत्ता (त्या) उदकपूर्व्वमति सृष्टाः [।]

---

1. Read धीमत्व—
2. Ibid सन्तका
3. Read भटाश्छा—
4. Ibid विश्रुतपूर्व्वया—
5. Ibid यथे—
6. Ibid धर्म्मायुर्बलैश्वर्य्यविवृद्धये
7. Ibid मया दत्तमिति
8. The reading may be—निबन्धनकृतः

19. उच्चिता [˙] श्चास्य पूर्व्वराजानुमता [न्] चातुर्व्वैद्यग्राम मर्य्यादा-
स्परिहावित[1]

20. रामः [।] अत्र वाटा (ट) काद्धँ वाणिजक चंद्रेण क्रयक्रीतं ब्राह्म [णे]
भ्यो भगवत्पद [म् ।]

Third Plate : Second Side.

21. तद्यथा अकरदायी अभटच्छत्रप्रावेश्य[2] अपरांपरतो (गो) बलिवर्द्द [:]

22. अपुष्पपि (क्षी) र स [˙] दोहः अचार (रा) सन चमा (र्मा) ङ्गार
[:] अलवणक्किरव (न्न) क्रेणी खनक [:]

23. सर्व्वविष्टिपरिहारपरिह्रि (हृ) तः सतिधिस्सोपतिथिः[3] सक्लि (क्लृ)-
प्तोपक्लि (क्लृ) प्तः

24. आचन्द्रादित्यकालीयः पुत्रपौत्रानुगामी भुञ्जता [˙] न केनचि [द्]

25. व्याघातन[4] कर्त्तव्यस्सर्व्वकृयाभि[5] स [˙] रक्षितव्यःपरिवर्द्धयितव्यश्च [।]
यश्चा—

26. स्मच्छासनमगनि (ण) यमाना (नः) स्वल्पामपि परिबाधात्कु (कु)
र्यात्कारयिन[6] वा

27. तस्य ब्राह्मणैर्व्वेवि (दि) तस्य सदराडनिग्रहं कुर्य्यामः (म ।)
अस्मिश्च[7] धर्म्म [ा] धि—

Fouth Plate : First side

28. करणे अतीतानेकराजदत्ता (त्त) सञ्चिन्न (न्त) न परिपालन [˙] कृत-
पुराया नुकि (र्की)—

29. र्त्तन परिहारार्त्थं [˙] न कीर्त्तयामः संकल्पाभियोधपराक्रम[8] (मो)
पजा (जि) तान्वत्थ (र्त्तं)—

30. याता (माना) ना ज्ञापयामः एष्यतत्काल[9]प्रभविष[णा]ा[10]–गौरवाद्भ-
वि[11]षाद्विज्ञा—

31. पयामः [।] व्यासगीतश्चात्र श्लोकः प्रमाणीकर्त्तव्यः ।
स्वदत्ता [˙]

32. परदत्ता [˙] व्वा (वा) यो हरेत वसुन्धरा [˙ ।]
गवा [˙] शतसहस्रस्य हन्तु—

33. ःपिबति दुष्कृतं (तम्) [॥]
संवत्सरे त्रयोविंशे वैशाख बाहुल पंचम्यां [।]

34. आज्ञा स्वयं [।] रज्जुक कोट्टदेवेन लिखितम् [॥]

---

1. Bose मर्य्यादापरिहारान् of Yirodi plates of the same king.
2. a Ibid अभटश्छात्र प्रावेश्य
3. Ibid सनिधिस्सोपनिधिः
4. Ibid व्याघातः
5. Ibid क्रियाभिः
6. Ibid कारयेद् वा
7. Ibid अस्मिंश्च
8. Read मियोग
9. Ibid एष्यत्काल
10. Ibid विष्णु
11. Ibid भविष्यान्

THE PALLAVA INSCRIPTIONS OF SEVEN PAGODAS

Prov. : Mahābalipuram, Madras,
Date : C. 7th Century A. D.
Lang. : Sanskrit. **Scr.** : Brāhmī.
Ref. : E.Hultzsch. *Ep. Ind.* X p. 1 ff.

1. Inscription on the 'Dharmarāja-Ratha' at Mahābalipuram

Text

I—First Storey
a—North
No. 1
श्रीनरसिंहः
No. 2
प्रिथिविसारः[1] श्रीभरः
b—East
No. 3
भुवनभाजानः[2]
c—South
No. 4
[श्री] मेघः त्रैलोक्यवर्द्धनः विधिः
No. 5
अत्यन्तकामः अनेकोभायः[3]
II—Second Storey
a—North
No. 6
स्थिरभक्तिः मदनाभिरामः विधि [:]
No, 7
श्रीनरसिंहः भुवनभाजनः श्रीमेघ [:] अप्रतिहतशासन [:]
No. 8
कामललितः अमेयमायः सकलकल्याणः
No. 9
नयनमनोहरः वाम [:] अतिमानः
b—East

---

1. Hultzsch पृथिविसारः
2. Ibid भाजनः
3. Ibid अनेकोपायः.

No. 10

वामः पराभरः[1]

No. 11

अनुपमः नया [ङ्कु] र [:]

c.—South.

No. 12

ललितः

No. 13

नयनमनोहरः सर्व्वतोभद्रः

No. 14

श्रीनिधिः निरुत्तरः

No. 15

विधिः विभ्रान्तः

d.—West.

No. 16

सत्यपराक्यमः[2] परावरः

III.—Thid Storey.

a.—East.

No. 17

श्री अत्यन्तकाम पल्लवेश्वर गृह(मू॥)रणजयः

b.—Ulest.

No. 18

अत्यन्त काम पल्लवेश्वर गृहम्

II.—Inscriptions on the Cave-temple at Saluvaiguppam.

No. 23

1. श्रीमतोत्यन्तकामस्य द्विष [द्]—
2. र्प्पापहारिणः [।]
   श्रीनिधेः काम—
3. रागस्य हराराधनसंगिनः [॥] [1]
4. अभिषेकजलापूर्णे चित्ररत्नाम्बुजाकरे [।]
5. आस्ते विशाले सुमुखः शिरस्सरसि शंकरः [॥] [2]
6. तेनेदं कारितं शम्भोर्भवनं भूतये भुवः [।]
   कै—
7. लासमन्दरनिभं भूभृतां मूर्ध्नि तिष्ठता [॥] [3]
   भक्तिप्रह्वे—

---

1. Hultzsch परापरः 2. Ibid पराक्रमः

8. ण मनसा भवं भूषणलीलया [।]
दोष्णा च यो भुवन्धत्ते
9. जीयात्स श्रीभरश्चिरम् [॥] [4]
अतिरणचण्डः पतिरवनिभु—
10. जामतिरणचराडेश्वरमिदमकरोत् [।]
इह गिरितन—
11. यागुहगणसहितो नियतकृतरतिर्भवतु पशुप—
12. तिः [॥] [5]
गुर्व्वीमीशानभक्तिं श्रियमतिशयिनीं दुर्व्वहं भारमुर्व्व्यां
13. निस्सामान्यञ्च दानं समम [तिर] णचण्डाख्यया [यो बिभर्त्ति] [।]
14. स्थाने निर्म्मापितेस्मिन्वि [दितरणज] यख्यातिना तेन [भ] र्त्ता
भूताना—
15. मष्टमूर्त्तिश्चिरमतिरणच [राडेश्वरे] यातु निष्ठाम् [॥ 6]
अ [नुष्ट] शील [ः ॥]
16. यदि न विधाता भरतो यदि न हरिर्न्नारदो न वा स्कन्दः [।]
बोद्धुं क इव
17. समर्त्थस्संगीतं कालकालस्य ॥ [7] ओं[1]
समरधनञ्जयः संग्रामधीरः ॥ ओं[2] ॥

No. 24.

1. श्रीमतोत्यन्तकामस्य
2. द्विषद्दर्पापहारिणः [।]
श्रीनि—
3. धेः कामरागस्य हराराध [न] संगि—
4. नः ॥ [1]
अभिषेकजलापूर्णे चित्ररत्नां—
5. बुजाकरे [।]
आस्ते विशाले सुमुखः शिरस्सर—
6. सि शंकरः ॥ [2]
तेनेदं कारितं शम्भोर्भव—
7. नं भूतये भुवः [।]
कैलासमन्दरनिभं भूभृतां
8. मूर्ध्नि तिष्ठता ॥ [3]
भक्ति [प्रह्वे] ण मनसा भव[1] भूषण—
9. लीलया [।]
दोष्णा च यो भुवन्धत्ते जीयात्स श्रीभरश्चि—
10. रम् ॥ [4]
अतिरणचण्डः पतिरवनिभुजामतिर—

1. Expressed by a symbol. 2. Hultzsch भवं

11. णचण्डेश्वरमिदमकरोत् [।]
इह गिरितनयागु—
12. हणसहितो नियतकृतरतिर्भवतु पशुपतिः [5]
13. गुर्व्वीमीशानभक्तिं श्रियमतिशयिनीं दुर्व्वहं भारमुर्व्या
निस्सा—
14. मान्यञ्च दानं सममतिरणच [ण्डाख्य] या [यो बि] भुर्त्ति [।]
स्थाने
15. निर्म्मापितेस्मिन्विदितर [णजयख्यातिना ते] न भर्त्ता
भूताना—
16. मष्टमूर्त्तिश्चिरम [तिरणचण्डे] श्वरे यातु निष्ठाम् ॥ [6]
स्वस्ति ॥

N. 25.[1]

अतिरणचण्डपल्ल [वेश्वरगृहम् ॥]

N. 26.[2]

अतिरणचण्डपल्ल [वेश्वरगृहम् ॥]

26. MAYIDAVOLU PLATES OF ŚIVASKANDAVARMAN

Prov. : Mayidavolu, Krishna district, Madras.
Date : Regnal year 10. **Lang.** : Prakrit.
Scr. : Curious Brāhmī of Southern type of the 4th century A. D,
Ref. : Hultzch. *Ep. Ind.* Vol. VI. p. 84 ff. Sirkar *S. Ins.* Vol. 1 433 ff.

Text

First Plate : First Side.

दिठं [॥]

First Plate : Second Side.

1

1. [सिद्धं ॥] [कां] चीपुरातो युवमहाराजो
2. भारदाय सगोत्तो पलवानं

---

1. Above the entrance of the cave-temple.
2. Below No. 25.

Second Plate : First Side.

2

3. सिवख [ॱ] दवम्मो धंञकडे
4. वापतं आनपयति [।]

Second Plate , Second Side.

5. अम्हेहि दानि अम्हि वेजयिके
6. [धं] मायु बल वधनिके य[1]

Third Plate. First Śide.

3

7. बम्हनानं अगिवेस सगोत्तस
8. पुवकोटुजस अगीवेस सगोत्तस

Third Plate; Second Side:

9. गोनंदिजस अंधापतीय[2] गामो
10. [विरिप] रं अम्हेहि[3] उदकादिं

Fourth Plate, : First Side.

4

11. संपदतो [।] एतस गामस
12. विरिपरस सव बम्हदेय

Fourth Plate, : Second Side.

13. प [रिहा] रो वितरामम [।] अ लोन [ख] ादकं
14. अ रठ सं [वि] नायिकं अ परंपरा बलीव[4] [दं]

Fifth Plate : First Side

5

15. अ भड पपेसं अ कूर चोलक
16. विनासि खट [ा] संवासं [।] एतेहि

Fifth Plate : Second Side.

17. अनेहि च सव बम्ह
18. देय मजादाय

Sixth Plate : First Side.

6

19. सव परिहारेहि परिहारितो [।]
20. परिहरथ परिहरापेथ च [।]

---

1. Read च
2. Ibid अंधापथीय
3. Omit अम्हेहि
4. Hultzsch बलिवदं

Sixth Plate : Second side.

21. जो अम्ह सासनं अतिछि
22. तून पीला बाधा करेज्जा[1] [वा]

Seventh Plate : First Side.

7

23. [त] कारापेज्ञा वा तस अम्हो
24. सारीर [ं] सासनं करेजामो [।]

Seventh Plate : Second Side.

8

25. स [ं] वछरं दसमं १० गिम्हा
26. पखो छुठो ६ दिवसं पंचमि ५ [।]

Eighth Plate

9

27. आनती सयत्ति दत्ता
28. पट्टिका [॥]

27. GUṆAPADEVA COPPER PLATE INSECRIPTION OF THE TIME OF SKANDAVARMAN

Prov. : Guṇapadeya. Guntur District Andhra State.
Date : **Lang** : Prakṛit. and Sanskrit
Scr. : Sourthern Brāhmī of the 4th Century A. D.
Ref. :

Text

First Plate

1

सिद्ध [ं] ॥

1. सिरि विजय खन्दव [म्म] महाराजस्स संव्वच्छ [छ] रा [।]
2. युवमहाराजस्स भारद्वायस्स[2] प [ल्लवा[3]]
3. णं सिरि विजय बुद्धवम्मस्स देवी ❀ ❀
4. कुर[4] जनवी [चारु[5]] देवी का (?) ❀ वीय ❀

1. Both Bühler and Hultzsch read जा Sarkar is inclined to regard it as an ordinary form of जो

2. Fleet reads भारद्वायण 3. Ibid पल्लवानां

4. Ibid कुजनवीहा, Hultzsch is in clined to fill the lacuna by (ब) द्धि (यं) कुर जनवी

5. चारु in adsenr in fleets trnscript

Second Plate, First Side

2

5. राजतलाक हे [ट्टे] प्राणिय [कू][1]
6. पादुत्तरे पासे [आ] तुकस्स कसित [व्वं]
7. छेत्तं[2] दाल्हूरे कूल्मिहातरक देवकुलस्स

Second Plate ; Second Side

3

8. भगवन्नारायणस्स अम्हं[3] आयु बल वद्धनी
9. यं कातून भूमी निवत्तणा[4] चत्तारि ४ अम्हेहि[5]
10. सम्पदत्ता [।] तं नातूण गामेयिका[6] आयुत्ता[7]
11. सव्व[8] [प] रिहारेहि परिहरथ परिहरापेथ[9] [।]

Third Plate

4

12. बहुभिव्वं [सु] धा दत्ता बहुभिश्च [ानुपा] लिता [।]
13. यस्य यस्य यदा भूमि तस्य[10] [तस्य] तदा फलम् [॥] [1]
14. स्व दत्ता ['] परदत्त [ा] ' वा ये हरत्ति[11] वसुन्धराम् [।]
15. गवां शत सहस्रस्य हन्तुः पिबति दुष्कृतम् [॥] [2]
16. आणत्ति रोहण[12] [ि] गुत्ता त्ति ॥

28. CHANDRVALLI STONE INSCRIPTION OF MAYNISARMAN.

Prov. : Chandravalli, Chitaldrug, Mysore.
Date : C. 4th century A. D. **Lang.** : Prākrit.
Scr. : Brāhmī of The Southern Class.
Ref. : M. H. Krisna Mys. *Arch.* Surv. A. R. 1929 p. 501
K. P. Jayaswal. History of India 150–350 A. D. p. 220 ff.

---

1. Fleet. राज···लाच्छ (?) णे (?) टे (?) पाणिय
2. Ibid छेत्रं दालगि (?) रे कूमि महा—
3. Ibid अबूमं
4. Ibid निवत्तने
5. Ibid अघू (?) हि
6. Ibid तातूण गामे एका
7. Instead of this Fleet has 200 (?) 80 (?) त्तर (?)
8. Fleet समय
9. Ibid परिहरट परिहरय
10. Ibid भूमिः तस्थ or भूमिस्तस्य
11. Read यो हरेत
12. Fleet रोहणि गुत्वात्ति

Text

1. कदंबाणं मयूरशम्मण विनिम्मिअं
2. तटाकं [कुट[1]] तेकूड[2] अभिर[3] पल्लव पुरि
3. योतिक[4] सकस्थ [न] सयिन्थक[5] पुणड मोकरि [ण] [॥]

29. TĀLGUNDA STONE-PILLAR INSCRIPTION OF THE TIME OF SANTIVARMAN.

Prov. : Talgundu. shimoga distict. Mysore.
Date : C. 455–70 A. D. **Lang.** : Sanskrit.
Scr. : Southern Brāhmī of Boxheaded variety.
Ref. : Bühler *Ind. Ant.* XXV p. 276 *Rice. Ep. Carn* Vol. VII p. 200 ff, Keilhorn *Ep. In.* VIII p. 319.

Text

सिद्धम् [॥]

1. नमश्शिवाय ॥
जयति विश्वदे [व] स [ं] घात निचितैकमूर्त्तिस्सनातनः [।]
स्थानुरिन्दु[7] रश्मि विच्छुरित द्युतिमज्जटाभार मण्डनः ॥ [1]
तमनु भू सुरा द्विज प्रवरास्सामर्ग्यजुर्व्वेद वादिनः [।]
यत्प्रसादस्त्रायते नित्यं भुवन त्रयं पाप्मनो भयात् ॥ [2]
अनुपदं सुरेन्द्र तुल्य [व] पु × काकुस्थवर्म्मा विशाल धीः [।]
भूपति × कदम्ब सेनानी बृहदन्वय [व्यो] म चन्द्रमाः

2. अथ वभूव द्विज कुलं प्रांशु विचरद्गुणेन्द्वंशु मण्डलम् ॥ [3] [।]
स्यार्षवर्त्म हारितीपुत्रमृषिमुख्य मानव्य गोत्रजम् ॥ [4]
विविध यज्ञावभृथ पुण्याम्बु नियताभिषेकार्द्र मूर्द्धजम् [।]
प्रवचनावगाह निष्णातं विधिवत्समिद्धाग्नि सोमपम् ॥ [5]
प्रणवपूर्व्वं षड्विधाद्ध्येय नानर्थमानान्तरालयम् ॥
अकृश चातुर्म्मास्य होमेष्टि पशु पार्व्वण श्राद्ध पौष्टिकम् [॥] [6]

3. अतिथि नित्यसंश्रितावसथं सवनत्रयावन्ध्य नैत्यकम् [।]
गृह समीप देश संरुढ विकसत्कदम्बैकपादम् ॥ [7]
तदुपचारवत्तदास्य तरोस्सानाम्य साधर्म्यमस्य तत् [।]
प्रववृते सतीर्थ्यं विप्राणां प्राचुर्य्यतस्त द्विशेषणम् ॥ [8]

---

1. M. H. Krisna reads दुभ 2. Ibid भेकूट
3. Ibid आभीर 4. Ibid परियात्रिक but his eye-copy has पुरियोतिक
5. Ibid सयिन्दक 6. Ibid पुनाट 7. Read स्थाणु

एवमागते कदम्बकुले श्रीमान्बभूव द्विजोत्तमः [।]
नामतो मयूरशर्म्मेति श्रुतशीलशौचाद्यलंकृतः [॥] [9]

4. यः प्रयाय पल्लवेन्द्रपुरीं गुरुणा समं वीरशर्म्मणा [।]
अधिजिगांसु ᳵ प्रवचनं न्निखिलं[1] घटिकां विवेशाशु तवर्कुकः ॥ [10]
तत्र पल्लवाश्वसंस्थेन कलहेण तीव्रेण रोषितः [।]
कलियुगे [ऽ] स्मिन्नहो बत क्षत्रात्परिपेलवा विप्रता यतः [॥] [11]
गुरुकुलानि सम्यगाराद्ध्य शाखामधीत्यापि यत्नतः [।]
ब्रह्मसिद्धिर्य्यदि नृपाधीना किमत ᳵ परं दु × खमित्यतः [॥] [12]

5. कुश समिद्द षत्स्तुगाज्य चरु ग्रहणादि दक्षेन पाणिना [।]
उद्ववर्ह दीप्तिमच्छस्त्रं विजिगीषमाणो वसुन्धराम् ॥ [13]
यो [ऽ] न्तपालान्पल्लवेन्द्राणां सहसा विनिर्जित्य संयुगे [।]
अद्ध्युवास दुर्ग्गमामटवीं श्रीपर्व्वतद्वारसंश्रिताम् ॥ [14]
आददे कराम्बृहद्वाण प्रमुखाद्वहून्राजमण्डलात् [।]
एवमेभि ᳵ पल्लवेन्द्राणां भृकुटीसमुत्पत्तिकारणैः ॥ [15]

6. स्वप्रतिज्ञा पारणोत्थान लघुभि × कृतार्थैश्च चेष्टितैः [।]
भूषणैरिवाबभौ बलवद्यात्रा समुत्थापनेन च ॥ [16]
अभियुयुक्षयागतेषु भृशं काञ्ची नरेन्द्रेष्वरातिषु [।]
विषम [दे] श प्रयाण संवेश रजनीष्ववस्कन्दभूमिषु ॥ [17]
प्राप्य सेना सागरं तेषां प्राहन्बली श्येनवत्तदा [।]
आपदन्तान्धारयामास भुजखड्गमात्र [व्य] पाश्रयः ॥ [18]

7. पल्लवेन्द्रा यस्य शक्तिमिमां लब्ध्वा प्रतापान्वयावपि [।]
नास्य हानिश्श्रेयसीत्युक्त्वा यम्मित्रमेवाशु वव्रिरे ॥ [19]
संश्रितस्तदा महीपालानाराध्य युद्धेषु विक्रमैः [।]
प्राप पट्टबन्धसंपूजां कर पल्लवै ᳵ पल्लवैद्धृताम् ॥ [२०]
भङ्गुरोर्म्मि वलितैर्नृत्यदपरार्णवाम्भ × कृतावधिम् [।]
प्रेहरान्तामनन्यसंचरणसमयस्थितां भूमिमेव च ॥ [21]

8. विबुध संघ मौलि संमृष्ट चरणारविन्द ष्षडाननः [।]
यमभिषिक्तवाननुध्याय सेनापतिं मातृभिस्सह ॥ [22]
तस्य पुत्र × कङ्गवर्म्मोग्र समरो [द्धु] र प्रा [ं] शु चेष्टितः [।]
प्रणत सर्व्व मण्डलोत्किष्ट[2] सित चामरो [द्धू] त शेखरः ॥ [23]
त [स्यु] त × कदम्ब भूमिवधू रुचितैकनाथो भगीरथः [।]
सगरमुख्य [स्स्व] यं कदम्ब कुल प्र [च्छन्न] ज [न्मा]जनाधिपः [॥] [24]

9. अथ नृप महितस्य तस्य पुत्रः
प्रथित यशा रघु पार्थिवः पृथु श्रीः [।]
पृथुरिव पृथिवीम्प्रसह्य यो [ऽ] रीन्
अकृत पराक्रमतस्स्वव [ं] श भोज्याम् ॥ [25]

1. Read निखिलं. 2. Read मण्डलोत्कृष्ट.

प्रतिभय समरेष्वराति शस्त्रो
त्लिखित मुखो [ऽ] भिमुख द्विषां प्रहर्त्ता [।]
श्रुतिपथ निपुण × कविः प्रदाता विविध कला कुशल×प्रजाप्रियश्च ॥ [26]

10. भ्रातास्य चारु वपुरब्द गभीर नादो
मोक्ष त्रिवर्ग्ग पटुरन्वयवत्सलश्च [।]
भागीरथिर्न्नरपतिर्म्मृगराजलीलः
काकुत्स्थ इत्यवनि मण्डल घुष्ट कीर्त्तिः ॥ [27]
ज्यायोभिस्सह विग्रहो [ऽ] र्थिषु दया सम्यक्प्रजापालनम्[1]
दीनाभ्युद्धरणं प्रधानवसुभिर्म्मुख्यद्विजाभ्यर्हणम् [।]

11. यस्यैतत्कुलभूषणस्य नृपतेः प्रज्ञोत्तरं भूषणम्[2]
तम्भूपा × खलु मेनिरे सुरसखं काकुत्स्थमत्रागतम् ॥ [28]
घर्म्माक्क्रान्ता इव मृग गण वृक्षर [।] जिं प्रविश्य
च्छाया सेवा मृडित मनसो निर्वृतिं प्राप्नुवन्ति [।]
तद्वज्ज्यायो विहत गतयो बान्धवास्सानुबन्धाः
प्रापुश्शर्म्मा व्यथित मनसो यस्य भू [मिं] प्रविश्य ॥ [29]

12. नानाविध द्रविण सार समुच्चयेषु
मत्त द्विपेन्द्र मद वासित गोपुरेषु [।]
संगीत वल्गु निनदेषु गृहेषु यस्य
लक्ष्म्यङ्गना धृतिमती सुचिरं च रेमे [॥] [30]
गुप्तादि पार्त्थिव कुलाम्बुरुह स्थलानि
स्नेहादर प्रणय सम्भ्रम केसराणि [।]
श्रीमन्त्यनेक नृपषट्पद सेवितानि
यो (ऽ) बोधयद्दुहितृ दीधितिभिर्न्नृपार्क्कः [॥] [31]

13. यन्दैव सम्पन्नमदीनचेष्टं
शक्तित्रयोपेतमयासनस्थम् [।]
शेषैर्गुणैः पञ्चभिरप्य साद्धया
स्सामन्त चूडामणयः प्रणेमुः ॥ [32]
सयिह भगवतो भवस्यादिदेवस्य सिद्धयालये सिद्ध गान्धर्व्व[3] रक्षोगणै-
स्सेविते
विविध नियम होम दीक्षा परैर्ब्बा [ह्म] णै (:) स्नातकै स्तूयमाने
सदा मन्त्र वादैश्शुभैः [।]

14. सुकृतिभिरवणीश्वरैरात्मनिश्श्रेयसं प्रेप्सुभिस्सातकर्ण्यादिभिश्श्रद्धया-
भ्यर्च्चिते[4] इदमुरुसलिलोपयोगाश्रयं भूपति × कारयामास काकुस्थवर्म्मा
तडाकम्म [हत्] [॥] [33]

---

1. Read पालनं.
2. Ibid. भूषणं
3. Read गन्धर्व्व.
4. Ibid. र्च्चित.

तस्यौरसस्स तनय·[स्य]विशालकीर्त्तेः
[प] ट्ट त्र्याप्पर्णविरा [जित] चारुमूर्त्तेः [।]
श्रीशान्तिवर्म्मनृपतेर्व्वरशासनस्थः
कुब्जस्स्वकाव्यमिदमश्म तले लिलेख ॥ [34]

15. नमो भगवते स्थान कुन्दूर वासिने महादेवाय [।]
नन्दतु सर्व्वं समन्तागतो (ऽ) यमधिवासः [।]
स्वस्ति प्रजाभ्य इति [॥]

E. INSCRIPTIONS OF CENTRAL INDIA

30. MANDASOR STONE PILLAR INSCRIPTION OF YAŚODHARMAN ALIAS VIṢṆUVARDHANA.

Prov. : Mandasor, Madhya Pradesh.
Date : M. E. 589 (= 532 A. D.).
Lang. : Sanskrit ; **Scr.** : Northern Brāhmi.
क्षुन्दान स्फुरदुग्रहेतिरुचिरे (रै) र्दोर्भिश्चतुर्भिर्व्वभौ[1] [4]
भ्रातुस्तस्यात्मजोभूत्कलितकुलयशाः ख्यातकाकुस्थनामा[2]
लोके गीतः प्रतीकपृयवचनतया[3] कक्कुकः क्ष्माभृदीशः ।
श्रीमानस्यानुजन्मा कुलिशधरधुरामुद्वहन्देवराजो
यश्चेच्छिन्नोरुपक्षक्षपितग—

5. ति कुलं भूभृतां सन्नियन्ता [5]

तत्सूनुः प्राप्य राज्यं निजमुदयगिरिस्पर्द्धिभास्वत्प्रतापः
क्ष्मापालः प्रादुरासीन्नतसकलजगद्वत्सलोवत्सराजः ।
यस्यैतास्सम्पदश्च द्विरदमदसुरास्वादसान्द्रप्रमोदाः
पद्माक्षीराक्षिपन्त्य[4] प्रणयिजनपरिष्वङ्गकान्ता विरेजुः [6]
ख्या [ताद्भण्डि][5]—

6. कुलान्मदोत्कटकरिप्राकारदुर्ल्लङ्घतो

यः साम्राज्यमधिज्यकार्म्मुकसखा[6] संख्ये हठादग्रहीत्
एकः क्षत्रियपुङ्गवेषु च यशोगुर्व्वीन्धुरं प्रोद्वह—
न्निक्ष्वाक [ो] ः कुलमुन्नतं सुचरितैश्चक्रे स्वनामाङ्कितं [7]
आद्यः पुमान्पुनरपि स्फुटकीर्त्तिरस्मा—
जातस्स एव किल नागभटस्तदाख्यः ।
यश्रा—

7. न्ध्र सैन्धवविदर्भकलिङ्गभूपैः

कौमारधामनि पतङ्गसमैरपाति [8]
श्र (ल) घ्यास्पदस्य सुकृतस्य समृद्धिमिच्छु—
र्यः क्षत्रधामविधिवद्धवलिप्रवन्धः[7] ।
जित्वा पराश्रयकृतस्फुटनीचभावं
चक्रायुधं विनयनम्रवपुर्व्यराजत्[8] [9]
दुर्व्वारवैरिवरवारणवाजिवार—
याणौघसंघट[9]—

---

1. R. C. Majumdar ब्बभौ.
2. R. C. Majumdar काकुत्स्थ
3. Ibid—प्रिय
4. Ibid—आक्षिपन्त्यः
5. Read ख्याता भण्डि०
6. R. C. Majumdar : साम्राज्यमधिज्य—
7. R. C. Majumdar बद्ध वलिप्रबन्धः.
8. Cf. V. 3 of Bhāgalpur copperplate of Nārāyaṇapāla (*Ind. Ant.* Vol. XV p. 304 f.) and V. 6 of Khalimnpur Copper plate (*Ep. Ind.* Vol. IV p. 243 f).
9. R. C. Majumdar यान—

8. न घोर घनान्धकारं ।
निर्जित्य वङ्गपतिमाविरभूद्विवस्वा-
नुद्यन्निव त्रिजगदेकविकासको यः [10]
आनर्त्तमालवकिराततुरुष्कवत्स-
मत्स्यादिराजगिरिदुर्गहठापहारैः ।
यस्यात्मवैभवमतीन्द्रियमाकुमार-
माविर्ब्बभूव भुवि विश्वजनीनवृत्तेः [11]
तज्जन्मा राम—
9. नामा प्रवरहरिवलन्यस्तभूभृत्प्रबन्धै[1]-
रावध्नन्वाहिनीनां[2] प्रसभमधिपतीनुद्धतक्रूरसत्वान् ।
पापाचारान्तरायप्रमथनरुचिरः सङ्गत[3] कीर्त्तिदारै-
स्त्राता धर्म्मस्य तैस्तैस्समुचितचरितैः पूर्व्ववन्निर्व्वभासे[4] [12]
अनन्यसाधनाधीनप्रतापाक्रान्तदि—
10. ङ्मुखः ।
उपायैस्सम्पदां स्वामी यः सव्रीडमुपास्यत [13]
अर्थिभिर्व्विनियुक्तानां सम्पदां जन्म केवलं ।
यस्याभूत्कृतिनः प्रीत्यै नात्मेच्छा विनियोगतः [14]
जगद्वितृष्णुः स विशुद्धसत्वः
प्रजापतित्वं विनियोक्तुकामः ।
सुतं रहस्य व्रत सुप्रसन्ना-
त्सूर्यादवा—
11. पन्मिहिराभिधानं [15]
उपरोधैकसंरुद्धविन्ध्यवृद्धेरगस्त्यतः[5]
आक्रम्य भूभृतां भोक्ता यः प्रभुर्भोज इत्यभात् [16]
यशस्वी शान्तात्मा जगदहितविच्छेदनिपुणः
परिष्वक्तो लक्ष्म्या न च मदकलङ्केन कलितः ।
वभूव[6] प्रेमार्द्रो गुणिषु विषयः सूनृत—

---

1. Ibid प्रबन्धः—
2. Ibid आबन्धन्
3. Ibid संगतः
4. Ibid निर्व्वभासे.
5. The reference is to the story of Vindhya mountain gradually rising higher and higher in order to cheek the daily course of the sun. When requested by the gods the sage Agastya approached the mountain and asked him to bow down in order to give him way to the South. The Vindhya agreed and as the sage never retured, it had to remain in the same position Cf. Mahābhārata, Vana-parva, chap. 104.
6. R. C. Majumdar. बभूव.

12. गिरा-
मसौ रामो वाग्रे स्वकृतिगणनायामिह विधेः [17]
यस्याभूत्कुलभूमिभृत्प्रमथनव्यस्तान्यसैन्याम्बुधे[1]-
र्व्यूढां च स्फुटितारिलाजनिवहान्हुत्वा प्रतापानले ।
गुप्ता वृद्धगुणैरनन्यगतिभिः शान्तैस्सुधोद्भासिभि-
र्द्धर्म्मापत्ययशःप्रभूतिरपरा लक्ष्मीः पुनर्भू—

13. र्नया [18]
प्रीतैः पालनया तपोधनकुलैः स्नेहाद्गुरूणां गणै-
र्भक्त्या भृत्यजनेन[2] नीतिनिपुणै वृन्दैररीणां पुनः ।
विश्वेनापि यदीयमायुरमितं कर्त्तुं स्वजीवैषिणा
तत्त्विन्ना विदधे विधातरि यथा सम्पत्पराद्धर्याश्रये [19]
अवितथमिदं यावद्विश्वं श्रुते—

14. रनुशासना-
न्नवति फलभाक्कर्त्ता नेशः क्षितीन्द्रशतेष्वपि ।
अधरितकलेः कीर्त्तिर्भर्त्तुस्सतां सुकृतैरभू-
द्विधुरितधियां सम्पद्वृद्धिर्यदस्य तदद्भुतं [20]
यस्य वैरि वृहद्वंशान्दहतः[3] कोपवह्निना ।
प्रतापादर्ण्णसां राशीन्पातुर्व्वैतृष्ण्यमावभौ[4] [21]
कुमारैव[5] विद्यानां

15. वृन्देनाद्भुतकर्म्मणा ।
यः शशासासुरान्घोरान्स्त्रैणेनास्त्रैकवृत्तिना [22]
यस्यान्वपटले राज्ञः प्रभुत्वाद्विश्वसम्पदः ।
लिलेख मुखमालोक्यै प्रातिलेख्यकरो विधिः [23]
उद्दामतेजः प्रसरप्रसूता शिखेव कीर्त्तिर्द्युमणिं विजित्य ।
जाया जगद्भर्त्तु—

16. रियाय-यस्य चित्रं त्विदं यज्जलधीन्ततार[6] [24]
राज्ञा तेन स्वदेवीनां यशःपुरायाभिवृद्धये ।
अन्तःपुरपुरं नाम्ना व्यधायि नरकद्विषः [25]
यावन्नभः सुरसरित्प (त्प्र) सरोत्तरीयं

---

1. Ibid. —आम्बुधेर्व्यू—
2. R. C. Majumdar भृत्य
3. Ibid. वृह—
4. Ibid —आवभौ
5. The reference is here to the war between the Devas and the Asuras in which Kumāra was the commander-in-chief of the former with his army of a number of Mātrikās (Vidyās). Cf. Mahābhārata. Śalyaparva, Chap. 45. (Madras ed.)
6. R. C. Majumdar जलधिं—

यावत्सुदुश्चरतपःप्रभवः प्रभावः ।
सत्यञ्च यावदुपरिस्थ (ष्ठ) मवत्यशेषं
तावत् पु—

17 नातु जगतीमियमार्थ[1]कीर्त्तिः[2] [26]
पातुर्व्विश्वस्य सम्यक्परममुनिमतश्रेयसस्सन्निधाना-
दन्तर्वृत्तिर्व्विवेकः स्थितेव पुरतो भोजदेवस्य राज्ञः ।
विद्वद्वृन्दार्जितानां फलमिव तपसां भट्टधन्नेकसूनु-
र्व्वालादित्यः[3] प्रशस्तेः कविरिह जगता साकमाकल्पवृत्तेः [27]

BARAH COPPER PLATE INSCRIPTION OF MIHIRABHOJA

Prov. : Barah, Kanpur, distt. U. P.
Date : V. E. 893 (=836 A. D.)
Lang. : Sanskrit ; **Script.** : Northern Brāhmī
Ref. : Hiranand Sastri, *Ep. Ind.* Vol. XIX pp. 15-19.

Text

1. ओं[4] स्वस्ति । श्रीमहोदयसमावासितानेकनौहस्त्यश्वरथपत्ति-
सम्पन्नस्कन्धावारात्परमवैष्णवो
2. महाराजश्रीदेवशक्तिदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिका-
देव्यामुत्पन्नः परममाहेश्वरो
3. महाराजश्री [व] त्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यातः
श्रीसुन्दरीदेव्यामुत्पन्नः परम्भगवतीभक्तो[5]
4. महाराजश्री [ना] गभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः
श्रीमतीसटादेव्यामुत्पन्नः परमादित्यभक्तो
5. महाराजश्रीरामभद्रदेवस्तस्य पुत्रस्तत्पादानुध्यातः
श्रीमदप्पादेव्यामुत्पन्नः परम्भगव—

---

1. Pt. Hirānanda reads अस्य.
2. For full discussion on the कीर्त्ति Cf. Fleet *C. I. I.* III. P. 212. note 65.
3. R. C. Majumdar. र्व्वालादित्य.
4. Expressed by a symbol.
5. We may with Dr. Ṣastri read here and below परम for the sake of uniformity.

6. तीभक्तो महाराजश्रीभोजदेवः ॥ श्रीकान्यकुब्जभुक्तौ । श्रीकालञ्जरमण्डलान्त—
7. ⨯ पाति उदु[म्ब] रविषयस [म्ब] द्धवलाकाग्रहारे समुपगतान्सर्व्वानेव यथास्था-
8. न नियुक्तान्प्रतिवासिनश्च समाज्ञापयति । उपरिलिखिताग्रहारस्स
9. र्व्वायसमेत आचन्द्रार्कक्षितिकालम्पूर्व्वदत्तदेवब्रह्मदेयवर्जितः परमेश्वरश्री—
10. शर्व्ववर्म्मदेवशासनं । महाराजश्रीनागभटदेवानुमतिञ्च दृष्ट्वा भागञ्च महा-
11. राजश्रीरामभद्रदेवराज्ये व्यवहारिणो वैगुण्यात्किञ्चित्काल म्विहतं ज्ञात्वा म-
12. या पित्रो ⨯ पुण्याभिवृद्धये । भरद्वाजसगोत्र वाजसनेय-सब्रह्मचारिभट्टकाच-
13. रस्वाम्यन्वयजब्राह्मणानामन्तरा विच्छेदमप्रमाणीकृत्य प्राग्भागक्रमेणैवो-
14. त्सङ्कलित इति विदित्वा भवद्भिस्समनुमन्तव्यः प्रतिवासिभिरप्याज्ञाश्रवण विधेयै [र्भूत्वा स] र्व्वा-
15 या एषाम्समुपनेया[1] इति ॥ रुद्रटेन प्रयुक्तस्य शासनस्य स्थिरायतेः । दूतको बालादि-
16. त्योत्र राज्यभट्टारिकासुतः ॥ सम्वत् १०० (×) ८ (=८००) ९०३ (ie. ८९३) कार्त्तिक शु दि ५ निबद्धं ।

SIYADONI STONE INSCRIPTION OF THE TIME OF DEVAPĀLA

Prov. : Siyadoni, Lalitpur Distt. U. P.
Date : 977 V. E. (=1024 A. D.)
Lang. : Sanskrit influenced by Prakrlt;
Script. : Nāgari of 11th Century A. D.
Ref. : Kielhorn, *Ep. Ind.* Vol. I. pp. 162–179.

Text

1. ओं ओं नमो भग [व] ते वासुदेवाय.........[य]......... ....धिरा [ज[2]] ....[दे वपा].........

---

1. H. Sastri. एषां समु—
2. Dr. Kielhorn has a little doubt in his restoration :—धिराज परमेश्वर श्रीभोजदेव पादानुध्यात परमभट्टारक महाराजाधिराज परमेश्वर श्रीमहेन्द्रपालदेव पादानां as below L. 4.

हाराजाधिराजपरमेश्वर [श्री]—[हेन्द्र] पालदेवपादा [नां] म [हीप्र]-

2. वर्द्धमानकल्याणविजय—[ज्ये ?] [सं]— — [रस][1] तेषु नवसत-षष्ट्यधिकेषु श्राव............सम्वत् ९६० श्राव [ण]......... ....गताशेषमहा [श] ब्दम [हा] सामन्ताधिपति [श्रीमदु]—[न्द्र ?]......[भु] ज्यमानस्त [त्पादाधिष्ठित] [व]......ञ्च [कु] ......[कौ] म्रिके श्रीपञ्च [स्था]...... [क] द्वाविंसतिकच्छितराकयोर्व्वारे [सतीहसे] का [ले वर्त्त-माने वार] प्रसु [ख]-

3. सकलस्थानेन संसारस्यानित्यत्वं बुध्वा[2] पुण्ययशोभिवृ [द्ध] ये स्वकीयतलसीमाप्रतिव [द्धक्षेत्रं] [पूर्व्वपश्चि] मतो हस्तद्विसतमात्रं दक्षिणोत्तरतो वा सपादहस्तद्विसत [मात्र] ञ्च वणिकचण्डुकेन सङ्कटसुतेन प्रतिष्ठापित पत्तनस्य दक्षिणदिग्विभागे पश्चिमाभिमुखश्रीनारायणभट्टारकस्याव-[लेपनस] न्मा [र्जना] ङ्ग [राग] धूपप्रदीपनैवेद्याद्यर्थं निवेदितं धर्म्माय मत्वा आचन्द्रार्कक्षित्युदधिसमकालिनं यावन्न केश्चि [त्परिपन्थना कर्त्त] [व्या] इ [ति]

4. सकलस्थानानुमतेन वा [र] स्वहस्तायेति ॥ छ ॥ मतं केसिआवारु-च्छितरावारु साक्षिणौ श्रुतें[3] लिखितसाक्षि वी [टु] राच्छड-पुत्रस्तथा वावण गोंदासुतः ॥ लिखितं स्थानानुमतेन करणिकसर्व्वहरिणा भोचुकपुत्रेणेति ॥ ॐ ॥ परमभट्टारक-महाराजाधिराजपरमेस्वरश्रीभोजदेवपादानुध्यातपरमभट्टारक-महाराजाधिराज परमेश्वरश्रीमहेन्द्रपालदेवपादानां महीप्रवर्द्धमानकल्यण[4] विजयराज्ये सम्वत्सरस-

5. तेषु नवसत [ष] ष्ट्यधिकेषु चतुरन्वितेषु मार्गसिरमास-वहुलपक्षतृतीयायां सम्वत् ९६४ मार्गं वदि ३ अद्येह सीयडोणिसमावासितमहाप्रातिहारसमधिगतासेषमहाशब्दमहा-सामन्ताधिपतिश्रीउन्दभटः ॥ समस्तराजपुरुषान्वोधयति विदितमस्तु भगवतां[5] अस्मिन् पत्तने नेमकवणिकचण्डुक-प्रतिष्ठापितविष्णुभट्टारकस्यास्माभि ७ परलोकनिस्रेयसार्थं[6] पुण्ययसोभिवृद्धये यौवनधनजीवितानि नलनीदलगतज-

6. ललवतरलतराणि लक्ष्य अक्षयनीवीयं निवेदिता ॥ सीयडोणिसत्कमण्डपि-कायां प्रतिदिनं पञ्चियकद्रम्मसत्कपादमेकं दातव्यं तथा दिनं प्रति मुद्र-यित्वा युगैका देया ॥ देवस्यावलेपनसन्मार्जनाङ्गरागध[ ]पप्रदीपनैवे-

1. Ibid. The restoration is—विजयराज्ये संवत्सरशतेषु.

2. Ibid. बुद्ध्वा.

3. Ibid. Either श्रुते or श्रुतं.

4. Dr. Kielhorn—कल्याण—

5. Ibid. भवतां

6. Ibid. निःश्रेयसार्थं

द्यार्थमाचन्द्रार्कक्षित्युदधिसमकालिनं यावत्पालनीयं कस्मिंश्चित्काले यः कोपि पुरुषः परिपन्थनाखश्चाकरोति उत्पादयति स पञ्चमहापातकै[1] लिप्यति स्वहस्तोयं श्रीउन्दभटस्य ॥ छ ॥

7. वहुलूरुद्रगणयोर्व्वारे वारप्रमुखस्थानेन निवेदिता अक्षयनीमिका ॥ ※ ॥ अस्मिनेव[2] काले तथा चण्डुकेन सङ्गटसुतेन प्रतिष्ठापितपश्चिमाभिमुख-श्रीविष्णुभट्टारकस्य समर्प्पिता वणिकचण्डुकस्तथा सावसस्तथा माहपा-[दिभि] स्साङ्गटसुतैः स्वकीयस्वकीयच्छाया [आ] त्मीय-अवासनिका उत्तराभिमुखा अस्याभ्यन्तरे उत्तराभिमुखगृहाणि चत्वारि अपसरक सहितानि अवलिप्तसिलाच्छ [द्या] नि अवासनिकाया [श्चा] घाटानि लिख्यन्ते [पूर्व्वे] ण र-

8. थ्या दक्षिणेन चण्डुकीयावासनिकास्वोलिकापातं पश्चिमेन सीयदेवसत्क-अवासनिका उत्तरेण च्छेण्डिकामर्यादा एवं चतुराघाटचिह्नोपलक्षिता महद्धर्म्महेतोरवलेपनसन्मार्जनधूपप्रदीपनैवेद्यार्थं प्रदत्ता यः कश्चित्परि-पन्थना करोति स च महानरकं व्रजति ॥ मतं चण्डुसावसमाहपानां स्साङ्गटसुतानामिति ॥ ※ ॥ तथा सम्वत्सरसतेषु नवसत पञ्चषष्टयधिकेषु अश्विनमासे प्रतिपदायां सम्वत् ९६५ अश्वि [न सु] दि १

9. वणिकनागाकेन चण्डुसुतेनापरिमितमूल्येन क्रीत्वां कुम्भकारदैवैकअड्ढ-चागा [न्दू] कलिआकादीनां अक्षयनीमिका देवस्य समर्प्पिता ॥ छ ॥ तथा समस्तकुल्लपालानां मध्ये यस्य यस्य सत्कमद्यभाण्डं नि ७ पद्यते विक्रयं याति स च सचाचन्द्रार्कं यावद्विग्रहपालसत्कद्रम्मार्द्धिका[3] ताली दातव्या ॥ [4]यष्वश्चित्परिपन्थना करोति स नरकं व्रजति स्थानीयभूमौ ये भूये भूता ये भविष्यन्ति कुम्भकारष्वलपालाश्च[5] तैरक्षयनीमिका पालनी-

10. या ॥ ※ ॥ तथा वारप्रमुखस्थानसम्बद्धकन्दुकानां पार्श्वात् कन्दुक [ना] इलभोइलतिकूदेगू [प] स [नू] कादीनां पार्श्वात् वणिकनागाकेन चाण्डूसुतेन सन्मार्जनविलेपैनधूपप्रदीपनैवेद्यार्थं अपरिमितमूल्येन क्रीत्वा कन्दुकानां प्रतिवराहकयविंसोपकैकं प्रतिदिनं वि १ ग्राह्यमाचन्द्रार्कं यावद्दोक्तव्यं यक्कश्चित्परिपन्थनाखश्चामुत्पादयति स च महापातक-पञ्चकैर्ल्लिप्यति ॥ स्वहस्तोय ४४४४ मिति ※ ॥

11. तथा सम्वत्सरसतेषु नव [स] त सप्त [ष] ष्ट्यधिकेषु फाल्गुनमास[6] अमावास्यां सम्वत् ९६७ फाल्गुन वदि १५ सीयडोण्यां वारप्रमुखस्थाने अद्दवुआनर सिंघयोर्व्वारे यथा नेमकवणिकचाण्डूकेन प्रतिष्ठापितश्री-विष्णुभट्टारकपश्चिमाभिमुखमुलाइतणदक्षिणदिग्विभागे नेमकवणिकवा-

---

1. Read —कैर्लि—
2. Ibid. अस्मिन्नेव
3. Dr. Kielhorn—द्रम्मार्द्धिका
4. Ibid. यक्कश्चि—
5. Ibid. कुम्भकाराङ्कुछ पालाश्च
6. Kielhorn expects—मासे.

सुदेवेन प्रतिष्ठाप्य श्रीविष्णुभट्टारकं उत्तराभिमुखं महान्तधर्म्मार्थहेतोः पूजापनसन्माज्र्जनधूपप्रदीपार्थं

12. दोसिहट्टे पूर्व्वाभिमुखावलिप्ताच्छन्ना उवटकसहिता देवस्य समर्पिता ॥ यस्याश्चाघाटानि लिख्यन्ते पूर्व्वेण हट्टरथ्या[1] दक्षिणेन वामनसत्कवीथी पश्चिमेन स्वोलिकापतमुत्तरेण[2] श्रीविष्णुभट्टारकवीथी मर्यादा एवं चतुराघाटविशुद्धा प्रदत्ता ॥ तथा वैस्वान्दर[3] पूजनार्थं वासुदे [वे] न स्वकीयगृहं पूर्व्वाभिमुखं उवटकसहितं प्रदत्तं अस्याघाटानि पूर्व्वेण प्रसन्नदेवियारकमर्यादा दक्षिणेन

13. वासुदेवगृहभित्ति ~ पश्चिमेन रथ्या उत्तरेण श्रीप्रसन्नवीथीमर्यादा एवं चतुराघाटविशुद्धं देवस्य प्रदत्तं यश्चिद्धरणविधारणविधारणा करोति स च नरकं व्रजति न संशयः ॥ ॐ ॥ तथा वणिकचण्डूकीयोपार्जना प्रसन्नहट्टे उत्तराभिमुखा वीथी अवलिप्ता उवटकसहिता अस्याश्चाघाटानि पूर्व्वेण सुभादित्यस्य वीथी दक्षिणेन भट्टदेवप्रसादसत्कावासनिकास्वोलीपातं पश्चिमेन चूंभा

14. वीथी उत्तरेण हट्टरथ्या मर्यादा ॥ छ ॥ तथा अपरं चाण्डूकेन साङ्गटसुतेन पितृपितामहोपार्जितं स्वीकीयं दक्षिणाभिमुखं वीथीचतुष्टयं अमीषामाघा [टा] नि[4] लिख्यन्ते पूर्व्वेण चूंभावीथी दक्षिणेन हट्टरथ्या पश्चिमेन स्वकीयावासनिकाद्वारोष्ठमर्यादा उत्तरेण स्वकीयावासनिका मर्यादा एवं चतुराघाटचिह्नोपलक्षिता[5] मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये[6] परमभक्त्या श्रीविष्णुभट्टारकस्य सा–

15. सनत्वे प्रदत्तं यश्चित्परिपथ्यनाखश्चा करोति स च महापञ्चपातकै-[7] र्लिप्यति नरकं व्रजति ॥ ॐ ॥ तथा [प्र] हपतिकताम्वूलिककेशवेन वटेश्वरसुतेन पितृपितामहोपार्ज्जितदक्षिणाभिमुखस्वकीयवीथी चतुर्हट्टे अस्याश्चाघाटानि लिख्यन्ते पूर्व्वेण कंसारकवीथी दक्षिणेन हट्टरथ्या पश्चिमेन केशवस्यव वीथी उत्तरेण कंदासघूटमर्यादा एवं चतुराघाटविशुद्ध चण्डूप्रतिष्ठापितपश्चि [मा] भि–

16. [मु] खश्रीविष्णुभट्टारकस्य प्रदत्ता आचन्द्रार्कं यावत्पालनीया यश्चित्परिपन्थना करोति स च महापञ्चपातकैर्लिप्यति[8] ॥ वीथी इयं सांप्रतं पूर्व्वाभिमुखा वर्त्तते ॥ स्वहस्तोयं केशवस्य ॥ ॐ ॥ तथा नेमकवणिकनागाकेन चाण्डूसुतेन दोसिहट्टे उपार्ज्जनां कृत्वा वीथीद्वौ २ पूर्व्वाभिमुखौ अवलिप्त उवटकसहितौ अनयोराघाटा लिख्यन्ते पूर्व्वेण हट्टरथ्या दक्षिणेन वासुदेववीथी पश्चिमेन स्वोली [पा]

---

1. Ibid. हट्टरथ्या. See, later in line 14.
2. Ibid. स्वीलिकापातमुत्तरेण.
3. Ibid. वैश्वानर—
4. One may, with Kielhorn expect अमूषामाघाटानि or आसामाघाटानि.
5. Kielhorn expects —लक्षित here.
6. Ibid.—वृद्धये.
7. Ibid.—कैर्लिप्यति.
8. Kielhorn.—कैर्लिप्यति.

17. [तं] उत्तरेण रामेवीथी मर्यादा एवं चतुराघाटचिह्नोपलक्षिता श्रीविष्णु-भट्टा [र] कस्य प्रदत्ता मातापित्रोरात्मनश्च पुण्ययसोभिवृद्धये यक्कश्चि-त्परिपन्थनाबाधा करोति स च षष्ठीं वर्ष सहश्राणि षष्ठीं[1] वर्षसतानि च विष्ठायां जायते कृमिः ॥ ॐ ॥ तथा नेमकवणिकसीलूकेन महापासुतेन उपर्जयित्वा[2] वीथी दक्षिणाभिमुखापसरकसहितावलिप्ताच्छन्ना[3] अस्या-श्चाघाटानि लिख्यन्ते पूर्व्वेण सावसवीथी दक्षिणे–

18. न हट्टरथ्या पश्चिमेन श्रीशिवभट्टारकवीथी मर्यादा एवं चतुराघाटविशुद्धं श्रीनारायणभट्टारकस्य धूपप्रदीपनैवेद्यार्थं प्रदत्ता यक्कश्चित्परिपन्थना करोति स च नरकं व्रजति महापञ्चपातकैल्लिप्यति[4] ॥ ॐ ॥ तथा सम्व-त्सरनवसतेषु एकोनसप्तत्यधिकेषु माघमासे पञ्चम्यां सम्वत् ९६९ माघ शुदि ५ अद्येह श्रीमत्सीयडोण्यां महाराजाधिराजश्रीधू [र्भ] टव्[5] परिभुज्यमाने तत्पादाधिष्ठितलोधुआकादिपञ्चकुलं

19. मण्डपिकायां कौषिकरस्थाकः स्थानारोपितअवुआनरसिंघयोर्व्वारे सती-ह्से काले वर्त्तमाने [ने] मकवणिकनागाकेन चाण्डूसुतेन समस्तकल्ल-पालानां पार्श्वात् अपरिमितमूल्येन क्रीत्वा कल्लपालमहत्तकपञ्चिकः सांत-डस्तथा राहडस्तथा कुराडाकस्तथा जसकरकादीनां समस्तकल्लपालानां सत्कहट्टानामुपरि दत्तश्रीमदादी[6] [वरा] ह पञ्चासदधिकानि सतानि त्रयोदशाङ्के वराहद्र १३५० अ–

20. तोर्थे सुराभाण्डं प्रति मासान्मासं विग्रहतुङ्गीयद्रम्मार्द्धं दातव्यं तालिं प्रति वि १० आचन्द्रार्कक्षितिकालिनं धूपप्रदीपनैवेद्यार्थं श्रीविष्णुभट्टारक-स्य प्रदत्तं यक्कश्चिद्धरणविधारणा करोति स च नरकं व्रजति ॥ ॐ ॥ तथा नेमकवणिकनागाकेन चाण्डूसुतेन मातंगानां पार्श्वादुपार्जित[7] मह [द्ध] र्म्मार्थहेतो[8] द्रोसिहट्टे युगंकं युगैकं प्रति कपर्दकद्वयं द्वयं कर दातव्यं मातङ्कोंवेजोहटाकस्तथा देरुलाकस्तथा रउंआक–

21. स्तथा संकराकस्तथा येम्वराकस्तथा हेम्व [टा] कादीनां[9] दोसिहट्टे समस्तयुगानामुपरि अक्षयनीमिका प्रदत्ता यक्कोपि परिपन्थना करोति स च नरकं व्रजति ॥ ॐ ॥ तथा नागाकेन दोसिहट्टे उपार्जिता पूर्व्वाभि-मुखा वीथी अवलिप्ता उवटकसहितास्याश्चाघाटानि पूर्व्वेण हट्टरथ्या दक्षिणेन भट्टजेहरिवीथी पश्चिमेन स्वोलीपातं उत्तरेण च्छेंडिका मर्यादा एवं चतुराघाटविसुद्धा श्रीनारायणभट्टारकस्य स–

22. मर्प्पिता यक्कोपि परिपन्थना करोति स च नरकं व्रजति ॥ ॐ ॥ तथा नागाकेन चाण्डूसुतेनात्मीयदक्षिणाभिमुखवीथीत्रयं उवटकसहितं अमीषां[10]

---

1. Ibid षष्टिं वर्ष सहस्राणि षष्टिं. 2. Ibid.उपार्ज्जयित्वा.
3. The original had—लिप्तासच्छन्ना. 4. Idid—कैर्लिप्यति.
5. Ibid टपरि— 6. Kielhorn श्रीमदादि—
7. Kielhorn expects—पार्ज्जितं. 8. Ibid—हेतोर्दोसि—
9. The original had—कादिनां 10. Dr. Kielhorn expects अमूषां न आस्वां

आघाटानि लिख्यन्ते पूर्व्वेण शिवभट्टारकवीथी दक्षिणेन हट्टरथ्या पश्चिमेन श्रीमाकीयदेववीथी उत्तरेण नागासत्कअवासनिकास्वोलीपातं एवं चतुरा घाटचिह्नोपलक्षिता विलेपनसन्मार्ज्जनधूपप्रदीपनैवेद्यार्थं श्रीनारायणभट्टा-रकस्य समर्प्पिता

23. यङ्कश्चित्परिपन्थना करोति स च न [र] कं व्रजति ॥ ❀ ॥ तथा स्थानानुमतेन वारपपद्मयोर्व्वारे नेमकवणिकभाइलेन गोविन्दसुतेन श्रीवामनस्वामिदेवपश्चिमाभिमुखस्य पितृपितामहोपार्जित[1] उत्तराभि-मुखा वीथी अवलिप्ता उवटकसहिता अस्याश्चाघाटानि लिख्यन्ते[2] पूर्व्वेण सीगासत्कदेववीथी दक्षिणेन स्वोलीपातं पश्चिमेन पुन[3] सीगासत्कदेव-वीथी उत्तरेण हट्टरथ्या मर्यादा एवं चतुराघाटचिह्नोप-

24. लक्षिता धूपप्रदीपनैवेद्यार्थं प्रदत्ताचन्द्रार्क्ककालिन यावत् रसीके विग्रह-पालीयद्रम्मतृभागं[4] तृ १ देवस्य दातव्यं यङ्कोपि परिपन्थना करोति स च नरकं व्रजति ॥ ❀ ॥ तथा नागाकीय उपार्ज्जना पूर्व्वाभिमुखौ गृहद्वौ अवलिप्तौ अपसरकसहितौ अस्याश्चाघाटानि पूर्व्वेणाकासभोग-प्राङ्गणं दक्षिणेन वामनगृहभीति पश्चिमेन स्वोलीपातं उत्तरेण च्छेण्डिका मर्यादा एवं चतुराघाट-

25. चिह्नोपलक्षिता सन्मार्ज्जनविलेपनगन्धधूपप्रदीपार्थं प्रदत्तं [5]तृभुवनस्वामि-देवस्य यङ्कश्चित्परिपन्थना करोति स च नरकं व्रजति ॥ ❀ ॥ तथा नागाकीयउपार्जनायां उत्तराभिमुख उवटकं ब्रा [ह्म] णताम्वोलिक-धमाकेन क्रयित्वा महन्तधर्म्मार्थहेतो[6] श्रीउमामहेस्वरस्य प्रदत्तं अस्या-घाटानि पूर्व्वेण सिवभट्टारकवीथी दक्षिणेन स्वगृहभित्ति[7] पश्चिमेन सिव-भट्टारकवीथी उ-

26. त्तरेण हट्टरथ्या मर्यादा एवं चतुराघाटविशुद्धं य ७ परिपन्थना करोति स नरकं व्रजति ॥ ❀ ॥ सम्वत् ९९४ वैसाख वदि ५ संक्रान्तौ[8] चण्डू कीयदेवस्य इह निवासी ताम्वोलिकमहर सवर केसवासुतस्तथा माधव इच्छूसुत समस्तलोकानां मिलित्वा अक्षयनामिका प्रदत्ता पर्ण्णपालिकां प्रति विग्रहद्रम्मविसोवकं विसोवकं प्रदत्तं वि १ आचन्द्रार्क्ककालिनं भोक्तव्यंमिति[9] ॥ स्वहस्तं सवरमाधवयोः ॥ ❀ ॥

27. [त] था सावसकीय दक्षिणाभिमुखा वीथी अवलीप्ता[10] उवटकसहिता कृतोपसन्ना अस्याघाटानि पूर्व्वेण सीगाकीयदेववीथी दक्षिणेन हट्टरथ्या पश्चिमेन सीलूवीथी उत्तरेण स्वोलीपातं एवं चतुराघाटविशुद्धं विलेपन-सन्मार्ज्जनधूपदीपनैवेद्यार्थं तृभुवनस्वामिदेवस्य[11] प्रदत्ता यङ्कोपि परि-पन्थना करोति स महापातकपञ्चकैलिप्यति[12] ॥ ❀ ॥ तथा नागाकीय-उपर्ज्जना[13] तैलिकवीदु तथा नारायणस्तथा ना-

---

1. Ibid.—पार्ज्जिता. 2. Ibid लिख्यन्ते 3. Ibid पुनः
4. Ibid त्रिभाग त्रि— 5. Dr. Kielhorn त्रिभुवन 6. Ibid हेतोः
7. Ibid.—भित्तिः 8. Ibid संक्रान्तौ. 9. Ibid भोक्तव्यमिति.
10. अवलिप्ता. 11. Ibid त्रिभुवन—. 12. Ibid कैर्लिप्यति. 13. Ibid उपार्ज्जना.

28. गदेवस्तथा महसोणः समस्ततैलिकानां घ्राणकं घ्राणकं प्रतिदिनं महन्तध-र्म्मार्थहेतोः तैलपलिका प्रदत्ता ॥ ※ ॥ परमभट्टारकमहाराजाधिराजपरमे-स्वरश्रीक्षितिपालदेवपादानुध्यात ७ परमभट्टार[1] [क] महाराजाधिराज-परमेस्वरश्रीदेवपालपादानां महीप्रवर्द्धमानकल्याणविजयराज्ये सम्वत्स-राणां सहस्त्रैकं पञ्चोत्तरं माघमासशुक्लपक्षपञ्चम्यां सम्वत् १००५ माघ शुदि ५ अद्येह

29. श्रीमत्सीयडोणिपत्तने महाराजाधिराजश्रीनिष्कलङ्क[2] ७ परिभुज्य [मा]-ने मण्डपिकायां सीहपादिपञ्चकुलं स्थानानुमतेन पाहूदेदेकयोर्व्वारे सतीदृशे काले वर्त्तमाने दोसिहटे समस्तमहाजनेन एकमतीभूत्वा महान्त-धर्म्मार्थहेतोर्व्वणिकविक्रमेन[3] प्रतिष्ठापितश्रीभाइलस्वामिदेवस्य प्रदत्तं मासान्मासं प्रति द्रम्मस्य तृभागं[4] तृ १ देयमिति ॥ ※ ॥ तथा सूत्रधार-जेजपस्तथा विसिआकस्तथा भलुआकस्थता जो [गू]-

30. [क] द्रकादीनां समस्तआहाडसम्बद्धसिलाकूटानां एकमतीभूत्वा श्री-विष्णुभट्टारकस्य भरणं भरणं प्रति विग्रहपालद्रम्मस्य तृभागं तृ[5] १ अचन्द्राक्ककालिनं यावद्धोत्कर्ण्यं यक्कश्चित्परिपन्थना करोति स च महापातकपञ्चकैर्लिप्यति ॥ ※ ॥ तथा सम्वत् १००८ माघ शुदि ११ अद्येह सीयडोणिपत्तने महाराजाधिराजश्रीनिष्कलङ्कस्तत्पादाधिष्ठितपुरं-दरादिपंञ्चकुलं मण्डपिकायां कौसिकमाधवः स्थानाधिष्ठिततुण्डिप्रद्युम्न-योर्व्वारे

31. इहाधिष्ठाने चंण्डूप्रतिष्ठापितश्रीविष्णुभट्टारकायतने पुरन्दरेण प्रतिष्ठापित-पश्चिमाभिमुखश्रीचक्रस्वामिदेवस्य दीपतैलार्थं इह निवासी तैलिकानां केसवस्तथा दुर्ग्गादित्यस्तथा के [सुं] लाक उजोणेक तुण्डिआकादीनां महान्तधम्मार्थहेतो[6] घाणकंघाणकं प्रति तैलपलिका प्रदत्ता यक्कश्चित्प-रिपन्थना करोति स च नरकं व्रजति ॥ ※ ॥ तथा पूर्व्वसूचित नेमकव-णिकपप्पाकेन देदडासुतेन यत्प्रतिष्ठापित श्री [च]-

32. क्रस्वामिदेव [स्य] वणिकमहादित्यनोहलाभ्यां पप्पासुताभ्यां [आत्मीया] वासनिका उत्तराभिमुखास्याभ्यन्तरे उत्तराभिमुखानि[7] गृहाणि त्रीणि ३ अपसरकप्राङ्गणसहितावलिसानि अस्याघाटानि पूर्व्वेण रथ्या दक्षिणेन स्वोलीपातं पश्चिमेन चाण्डूसत्कावासनिका उत्तरेण द्वारोष्ठनिष्कासप्र-[वे] सक मर्यादा एवं चतुराघाटचिह्नोपलक्षिता विलेपनसन्मार्ज्जनधूप-प्रदीपनैवेद्यार्थं प्रदत्तं यक्कश्चित्परिपन्थना करोति स च नरकं [व्र]-

---

1. Dr. Kielhorn.—ध्यातपरम—.
2. Ibid.—लङ्कपरि—.
3. Ibid.—विक्रमेण.
4. Ibid.—त्रिभागं त्रि.
5. Ibid—त्रिभागं त्रि १ आच—.
6. Dr. Kielhorn.—हेतोर्घा—
7. Original had उत्तरीभि—.

33. जति ॥ स्वहस्तोयं महादित्यनोहलयोः ॥ ❀ ॥ तथा पूर्व्वसूचितस [म्वत्] ९९१ माघ शुदि १० नगाकः[1] 'वाण्डूसुतस्तथा [दे] दैकस्तथा वालिस्तथा रुदाक जाजूसुतास्तथा च्छिन्तराकः साल्लासुत एकमतीभूत्वा स्वकीय स्तथा स्वकीयच्छाया महान्तधर्म्मार्थहेतो ७ पूर्व्वाभिमुखा अवासनिका-अपसरकप्राङ्गणसहिता अस्याघाटानि पूर्व्वेण निष्कासप्रवेसद्वारोष्ठकं दक्षिणेन विषयणकहूपसत्कावासनिका पश्चिमेन कविलासत्क [अवा]-

34. सनिका उत्तरेण सावससत्कअवासनिका मर्यादा एवं चतुरा [घा] टविशुद्धा अस्याभ्यन्तरे समस्तगृहसमेतां समस्तवीथीसमेतां च देवस्य प्रदत्ता यक्कोपि वि [घ्न] करोति स चात्मीयपुरुषचयं नरकं नयति यक्कोपि वीथीषु प्रवसति स च गोष्ठिभावितं भाटकं ददाति दायादस्या [धि] कारं नास्ति स्वहस्तोयं नागादेदैवालीरुदाकादीनां मतं लिखितं सर्व्वह [रि] पुत्रेण रच्छाकेन ॥ ❀ ॥ तथा देदैकस्तथा वालीकस्तथा

35. तथा रुदाक जाजू सुतागेभि[2] प्र [दत्ता] चण्डूप्रतिष्ठापितपश्चिमाभिमुख-श्रीविष्णुभट्टारकस्य चतुष्कहटे[3] पश्चिमाभिमुखा वीथी अवलिप्ता उवटक-सहिता कृतोपसन्ना अस्याघाटानि लिख्यन्ते[4] पूर्व्वेण [ओ] लीपातं दक्षिणेन श्रीअ [म्ब] लोहीदेविजगति७पश्चिमेन हट्टरथ्या उत्तरेण तिखरावीथी मर्यदा[5] एवं चतुराघाटविसुद्धा विलेपनसन्मर्जन[6] धूपप्रदीप नैवेद्यार्थं प्रदत्ता [यक्क]-

36. श्चित्परिपन्थना करोति स च नरकं घोरं व्रजति पितृपितामहैस्सह ॥ स्वहस्तोयं देदैवालीरुदाकादीनां सम्मतं लिखितं स्वामिकुमारेण सर्व्व-हरिसुतेनेति ॥ ❀ ॥ सम्वत् १०२५ माघ वदि ९ अद्येह सीयडोणिपत्तने महाराजाधिराजश्रीनिष्कलङ्कपरिभुज्यमाने तत्पादाधिष्ठितकेशवराजादि पञ्चकुलं स्थानानुमतेन पाहूदेदेकयोर्व्वीरे स्तीदसे काले इहाधिष्ठाने द-

37. [क्षि] णे दिग्विभागे चाण्डुप्रतिष्ठापितपश्चिमाभिमुखश्रीविष्णुभट्टारक-स्यायतने नेमकजातिवणिकमहादित्येन पेपेसुतेन प्रतिष्ठापितपूर्व्वाभिमुख-श्रीविष्णुभट्टारकस्य वणिकश्रीधरेण महादित्यसुतेन विलेपनसन्माजंन-पूजापनधूपप्रदीपनैवेद्यार्थं श्रीमदादीवराहद्रम्मस्य[7] पादैकं प्रदत्तं एतदर्थे मासान्मासं प्रति दीयमानं पञ्चियकद्रम्मैकं सास-

38. [नं] लिखितं अङ्क पंद्र १ एतदर्थे [सा] च वीथी [नागासत्का] दक्षिणाभिमुखा उवटकसहिता कृतोपसन्ना भोगाधिना तिष्ठति अस्या-

---

1. Ibid नागाकः चाण्डू—
2. Dr. Kielhorn. रुदाको जाजूसुता एभिः
3. Ibid —हट्टे.
4. Ibid (अस्या आघाटानि) लिख्यन्ते
5. Ibid मर्यादा.
6. Ibid.—सन्मार्जन—; better—सम्मार्जन—.
7. Dr. Kielhorn. श्रीमदादि— .

वाटानि लिख्यन्ते पूर्व्वेण श्रीशिवभट्टारकवीथी दक्षिणेन हट्टरथ्या पश्चिमेन सीलुकवीथी उत्तरेण ओलीपातं मर्यादा एवं चतुराघाटविशुद्धा अस्या वीथ्या मोचापनकाले अपरवीथी अनुरूपा[1] सासने लिखाप्य भोक्तव्या आचन्द्रार्क्क-

39. क्षितिकालिनं यावद्यो [क्तव्यं] यश्चश्चि [त्खश्रावाधा] [ददाति] स च महान्तं नरकं व्रजति मतं सिरिधर महादित्यसुतस्य लिखितं करणिकधीरवर्म्मणा[2] स्वामिकुमारसुतेनेति ॥ ⊛ ॥ ओं ओं नमो गणपतये ।

घ्नंतु वो गणनाथस्य हस्ताक्षेपवमंथवः ।
विघ्नं रेणुं क्षितेः क्षिप्रं विन्दुभिर्जलदा इव ॥

योसौ [च] क्राम धात्रीं गिरिकुहरसरित्सागरानूपरम्यां पादेनैकेन कृत्स्नां वलिच्छलनव[3]-

40. [शा] न्मूर्त्ति [मास्था] य [ह] स्वां ।
स्वर्गं [म्वभ्राम[4]] साकं पवनप [थ] गणैर्भा [नुचन्द्र] ग्रहाग्रयैः
सोव्याश्चिविक्रमो व [स्तृ[5]] तयपदपथो यस्य देवैर्न्न लब्धः[6] ॥
महोदयामरावत्यां मनुष्येन्द्रेण धीमता ।
रायक्कं नाम नगरं ब्राह्मणेभ्यों[7] ददे किल ॥
रायक्कभट्टा इति ते ख्यातिं प्राप्ता महीतले ।
दातारः शत्रुजेतारो विद्वांसो सुवहुश्रुताः[8] ॥
तेषां प्र—

41. तीरकुलसंततिसुप्रसूति-
श्चारित [चा] रधनधैर्य्ययुतो व [शि] ष्ठः ।
शिष्टप्रहर्षजनकः स कलौ [वभूव[9]]
सद्भावभावपरिभावितचित्तवृत्तिः॥
शुभ्रास्ततु [ल्यैर्भ] वनैर्व्विरा [जि] ता-
त्कैलासश्रृङ्गादिव गुह्यकाधिपः ।
द्रव्यङ्गृही [त्वा] किल मातृयानकात्
केनापि कार्य्येण चरन्निहागतः ॥
तेना [स्मि] न्नगरीन्द्रकंदरमुखे दृष्टो नृपः शिंहव[10]-
[च्छ्री] मद्राजकुले [भ]—

---

1. Ibid अनुरूपा. 2. Original had—वर्म्मणा. 3. Ibid वलि—
4. Dr. Kielhorn. स्वर्गं (वभाम ?). 5. Ibid. वस्ति—.
6. Ibid. लब्धः. 7. Ibid. ब्राम्ह—. better ब्राह्म.
8. Ibid. सुवहु—. 9. Ibid. वभूव. 10. Ibid. सिंह—

42. दृप्यंशमनप्रो [द्भू] तगुंजारवः ।
गत्वा कौतुकपूरितान्तरगतो राज्ञः समीपेवस-
[च्छ्री] मन्तं हरिराजमाहवह [रे] रासाद्य पूजामनु ॥
तस्यात्मजः ख्यातगुणोपपन्नो दामोदरो नाम [ज] गत्प्रसिद्धः
सोसारतां वीक्ष्य हिरण्यजीवात्कारापयामास गृहं सुरारेः ॥
ग्रावाणपुंजैरिव सिद्धकोस्मिन्सोपानमाहृत्य ग [तोन्त]—

43. रिक्षम् ।
श्रृङ्गं हिमाद्रेरिव वानरेण [आ] नीय [मु] क्तं [ल] वणाब्धिवंधात्[1] ॥
ये [नाभू] न्निजवाहुपंजरवृहद्गुप्त्याश्रुता[2] रोदसी
हप्तप्रोद्धतदैत्यकटुकठिनच्छेदोद्गम [च्छो] णितैः ।
स्नाता [य] स्य वसुन्धरा करवरैर्द्धौता पवित्रीकृता
तस्यान्नां प्रविवेस[3] लक्षणवतीं त्रैविक्रमीयां शुभाम् ॥
मोरानीपार्ज्जुनाम्रैर्ग्गगनप[4] [रि] चि—

44. तैस्तालमालामधूकै-
[र्ना] रङ्ग्या राजजंब्वा[5] फलभरमितैर्द्दाडि [मीमातुलुंगैः] ।
[जातीने] वालजालैर्व्विकसितसुमनोमल्लिकामंजरीभिः
पुष्पै [र्व्व] न्यप्रधानैः सम [श] नरुचिरै राजितं वृक्षषण्डैः ॥
प [त्तनात्पूर्व्वमारामं] मंदाकि [न्या] दिगुत्तर [म् ।]
ददौ स नित्यपू [जार्थं] न्तस्मै सत्कारसिद्धये ॥
विप्रकीयगृहपश्चिमभा [गा]—

45. देवभूमिनिल [यात्पु] रतश्च ।
दक्षिणेन वणिजो[6] निजरथ्या उ [त्तरे]प्र ⏑⏑ – ⏑ ⏑ [पश्चात्] ॥
[त] स्य············प्रतिमासं············[लो] हवानाम् ।
दोष·········[मं] डपिकायामध्यर्द्ध [का] किणीं—[दिने दिने] ॥
·········[हारिकां प्रति] वराटकै [कां] ?···देव्याः
·········णर [थ्या]·········कगृहं १ वसन्तमह [त्त] कहट्टे [व]-

46. णि [ग]·········महत्तकहट्टे············पुर [तो] र [थ्या]
च्छि·········॥–[जा] ⏑ पूरि ⏑ ⏑ – [रयशः] पताका
– – ⏑ – [रणमुखे त्रि] दिवं प्रयातः । तस्या] त्मजेन
वरविप्रनतांह्रियुग्मो दामोदरेण⏑ ⏑ – ⏑ ⏑ – ⏑ – – ॥ ❀ ॥

---

1. Dr. Kielhorn.—ब्धिबन्धात. 2. Ibid. बाहुपंजरबृह—.
3. Ibid प्रविवेश. 4. Ibid—नाम्नै- 5. Ibid जम्ब्वा.
6. Original had वणिजो णिजो, but the second णिजो is struck out.

44. CHANDRAVATI PLATE OF CHANDRADEVA.

Prov. : Chandravati, Varanasi district, U. P.
Date : V. Samvat 1184 (= 1081 A. D.).
Lang. : Sanskrit. **Script.** : Nāgarī.
Ref. : Sten Konow, *Ep. In*, IX. 303.

Text

1. ओं स्वस्ति ॥ अकुण्ठोत्कण्ठ-वैकुण्ठ-कण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेस्तु वः ॥
आसीदसी (शी) तद्यु–
2. तिवंस (श) जात [क्ष्मा] पालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना यशोविग्रह इत्युदारः ।
तत्सुतोभूत्म (न्म) हीचंद्र–
3. श्च [ं] द्रधामनिभं निजं ।
येनापारमकूपारपारे व्यापारितं यशः ॥
तस्याभूत्तनयो नयैकरसिकः क्रांतद्विषन्मंडाला (मंडलो)
विद्ध्[1]स्तोद्धत–
4. धीरयोधतिमिरः श्रीचंद्रदेवो नृपः ।
येनोदारतरप्रतापस (श) मिताशेषप्रजोपद्रवं श्रीमद्गाधिपुराधिराज्य-
मसमं दोर्विक्र–
5. मेणार्जितं ॥
तीर्थानि काशिकुसि (शि) कोत्तरकोश (स) लेन्द्र (-)
स्थानीयकानि परिपालयताभिगम्यः (य) ।
हेमात्मतुल्यमनिसं (शं) ददता द्विजेभ्यो
6. येनांकिता वसुमती शतस (श) स्तुलाभिः ॥
स च परमभट्टारकमहाराजाधिराजपरमेस्व (श्व) र परममाहेस्व (श्व)
रःनिजभुजोपा [र्ज] जितश्री का–
7. न्यकुब्जा (ब्जा) धिपत्य श्रीचंद्रदेवो विजयी ॥ वावन पत्तलायां वडग-
वाग्रामे निवा [सिनो निखिल] जनपदानुपगतानपि च राजराज्ञी
युवरा–
8. जमंत्रिपुरोहितप्रतीहार सेनापति भांडागारिकाक्षपटलिकभिषक (षग्)–
नैमि [त्तिकांतःपु] रिकदूतकरितुरगपत्तनाकरस्थानगो [कु]–

1. Konow विध्वस्त—.

9. लाधिकारिपुरुषानाज्ञापयां (य) त्यादिशति च यथा विदितमस्तु भवतां यथोप [रिलिखि] त ग्राम [:] सजलस्थलः सलोहलवणाकरः सम-

10. [त्] स्याकरः सगर्त्तोषरः सममधूकाम्रवनवाटिकातृणयूतिगोचरपर्यंतः सोर्द्धा [द्ध्वा] धश्चतुराघाटविसु (शु) द्धः स्वसीमापर्यन्तः [संवत्]-

11. ११४८ कार्त्तिक सुदि..........अद्येह सौ (शौ) रि नारायण समीपे स्नात्वा विधिवन्मंत्रदेवपु (मु) नि मनुजभूतपितृगणांस्तर्पयित्वा ति-

12. मिरपटलपाटनप [टु म] हसंस (सम) [ु ष्णुरोचि] षं समभ्यर्च्य त्रिभुवन[1] त्रातुर्वासुदेवस्य पूजां विधाय प्रचुरपायसेन हविषा हविर्भुजं [हु] त्वा-

13. मातापित्रोरात्मन [श्च] पुण्यय (य) [शोभिवृद्धये] वसिष्ठगोत्राय। वसिष्ठैकप्रवराय अणरुधपौत्राय वर [ा] हस्वामिपुत्राय। वरुणेस्वय (श्वर)-

14. स (श) र्म्मणे ब्रा (ब्रा) ह्मणाय गोकर्स (र्ण) कुशलतापूतकरतलो- दकेनास्माभिः आचंद्रार्कं यावच्च (च्छा) सनीकृत्य प्रदत्तः। मत्वा यथादीयमानभागभो-

15. गकरप्रवणिकरतुरुष्कदंड कुमरगदिआणकप्रभृतिसमस्ता [न] नियताऽ- नियतादायानाज्ञा (ं) विधेयीभूय दास्यथ-

16. इति ॥ भवंति चात्र पौराणिका [:] श्लोकाः ॥ ॥
भूमिं यः प्रतिगृह्णाति यश्चभूमिं प्रयच्छति।
उभौ तौ पुण्यकर्म्माणौ नि-

17. यतौ स्वर्ग्ग (र्ग) गामिनौ ॥
सं (शं) खं भद्रासनं च्छत्रं[2] वराश्वा (श्वा) वरवारणाः।
भूमिदानस्य चिह्नानि फलम (मे) तत्पुरंदर ॥
षष्टिं (ष्टिं) वर्षसहस्रा-

18. णि स्वर्ग्गे वसति भूमिदः [।]
आच्छेत्ता चानुमन्ता च तान्[य]ेव नरकं (के) वसेत् ॥
स्वदत्तां परदत्तां वा यो हरेद्व (त व) सुंधरां।
स विष्ठायां कृमिर्भूत्वा

19. पितृभिः सह मज्जति ॥
वारिहीनेष्वरण्येषु शुष्ककोटरवासिनः।
कृष्णसर्प्पाश्च (श्च) जायंते देवब्र (ब्र) ह्मस्वहारिणः ॥
न विषं वि [ष] मित्या-

20. हु [ं] ब्र (ब्र) ह्मस्वं विषमुच्यत (ते)।
विषमेकाकिनं हंति (ं) ब्र (ब्र) ह्मस्वं पुत्रपौत्रिआकं (पुत्रपौत्रिकं) ॥

---

1. The engraver originally engraved त्रिभुवम, but corrected it.
2. Konow. छत्तम्

गामिकाम् स्वर्णमे[1]कं भूमेरप्येकमंगुलं ।
हरं (हरन्) नरकमाप्नोति यावदा-
21. भूतस [ं] प्लवं ॥
तडागानां सहस्राणि अस्वम [`] धसतानि[2] च ।
गवां का (को) टि प्रदानन (नेन) भूमिहर्त्ता न सुयति (शुध्यति) ॥
व (ब) हुभिर्वसुधा भुक्ता राजभिः च (स) ग-
22. रादिभि [:] ॥ (।)
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥
यानीह दत्तानि पुरा नरे [=] द्रै [°]
दानानि वर्म्मार्थिय[3]सस्कराणि [।]
नि [र्माल्यवांत प्रति]-
23. मानि तानि
को नाम साधुः पुनरादधीत ॥ ॥
लिखीतंमिदं[4] तांम्रपटक [ं] ठक्कुरश्रीमहणंद ॥

45. SARNATH INSCRIPTION OF KUMARADEVĪ

Prov. : Sarnath, Varanasi district, U. P.
Date : Middle of the 12th century. A. D.
Lang. : Sanskrit. **Script.** : Nāgarī.
Ref. : Sten Konow, *Ep. Ind.* IX, pp. 319–328.

Text

1. ओं नमो भगवत्यै आर्यवसु[5]धारायै ॥
समवतु वसुधारा धर्मपीयूषधारा-
प्रशमितवहुविश्वोद्दामदुःखोरुधारा ।
धनकनकसमृद्धिं भूर्भुवः श्वः[6] किरन्ती
तद्-
2. खिलजनदैन्यान्याजयन्ती जगन्ति ॥ [1]
नैत्रैरुत्कण्ठितानां चरणमुपनयंश्चारु चन्द्रोपलाना-
म्मानग्रन्थिम्विभिन्दन् सह कुमुदवनीमुद्रया मानिनीनाम् ।
दग्धन्दग्धेश्वरेणा [मृ]-

---

1. Ibid. गामेकां स्वर्णमेकं च.
2. Konow. अश्वमेधशतानि च.
3. Ibid. धर्मार्थयशस्—.
4. Ibid. लिखितमि—
5. वसुधारा is a Buddhist goddess.
6. Konow स्वः.

3. तनिकरकरैर्जीवयन् कामदेवं
कान्तोयं कौमुदीनां स जयति जगदालोकदीपप्रदीपः ॥ [2]
वंशे तस्य नमस्यपौरुषजुषि प्रस्फारकीर्त्तित्विषि
द्राक् शौचेन सु [राप]–

4. गामदमुषि प्रत्यर्थिलक्ष्मीरुषि ।
वीरो वल्लभराजनामविदितो मान्यः स भूमीभुजां
जेतासीत्पृथुपीठिकापतिरतिप्रौढप्रतापोदयः [3]
छिक्कोरवंशकुमुदोदयपूर्ण–

5. चन्द्र
श्रीदेवरक्षित इति प्रथितः पृथिव्याम् ।
पीठीपतिर्गजपतेरपि राज्यलक्ष्मीं
लक्ष्म्या जिगाय जगदेकमनोहरश्रीः ॥ [4]
तस्मादास पयोनिधेरिव विधु–

6. र्ल्लावण्यलक्ष्मीविधु–
र्नेत्रानन्दसमुद्रवर्द्धनविधुः कीर्त्तिद्युतिश्रीविधुः ।
सौजन्यैकनिधिः स्फुरद्गुणनिधिर्गाम्भीर्य्य-वारान्निधि–
र्ह्म्मार्द्वैतनिधिः स च[ण्ड]म–

7. निधिः शस्त्रैकविद्यानिधिः ॥ [5]
दीनानामभिवाञ्छितैकफलदः प्रत्यक्षकल्पद्रुमो
दृप्यद्वैरिगिरीन्द्रभेदनविधौ दुर्वारवज्रश्च यः ।
कान्तान [ा] म्मद–

8. नज्वरोपशमने सिद्धौषधीपल्लवो
वाहुर्यस्य वभूव भूतलभुजामन्तश्चमत्कारिणः ॥ [6]
गौडेऽद्वैतभटः सकाण्डपटिकः क्षत्रैकचूडामणिः
प्रख्यातो[1]

9. महणाङ्कपः क्षितिभुजाम्मान्योभवन्मातुलः ।
त (तं) जित्वा युधि देवरक्षितमधात् श्रीरामपालस्य यो ।
लक्ष्मीं निर्जितवैरिरोधनतया देदीप्यमानोदयाम् ॥ [7]
कन्या महण–

10. देवस्य तस्य कन्येव भूभृतः ।
सा पीठी[2]पतिना तेन तेनेवोढा स्वयम्भू (भु) वा ॥ [8]

---

1. Konow प्रख्यातो.

2. Konow suggests that "Pīṭhī or Pīṭhikā is synonymous with Pīṭha" and is therefore possible that Pīṭhī is identical with Pīṭhāpuram (*Ep. Ind.* IX. p. 322). For other variants of Pīṭhāpura or Pīṭhāpuri Cf. *Ep. Ind.* IV p. 37, 357, N. 4.

ख्याता शङ्करदेवीति तारेव करुणाशया ।
व्यजेष्ट कल्पवृक्षाणां लता दानोद्यमेन या ॥ [9]
अ-

11. जनि कुम[1]रदेवी हन्त देवीव ताभ्यां
शरदमलसुधाङ्शो[2]श्चारुलेखेव रम्या ।
दुरितजलधिमध्याल्लोकमुद्धर्त्तुकामा
स्वयमिह करुणार्त्ता तारिणीवावतीर्णा ॥ [10]

12. याम्वेधाः प्रविधाय शिल्परचनाचातुर्य्यदर्प्पं व्यधा-
द्यद्वक्त्रेण जितस्तुषारकिरणो ह्रीणः स स्वस्थोभवत ।
रात्रावुद्गममातनोति मलिनो जातः कलङ्कीतत-
स्त-

13. स्याः सुद (सुन्द) रिमा स विष्मय[3]करो वाच्यः मिमष्मा[4]द्दशैः ॥ [11]
चित्रश्चञ्चलदक्कुरङ्गमवधूवन्धस्फुरद्रागुराम्
विभ्राणा तनुसम्पदम्प्रविलसत्कान्त्याभिकान्तश्रिया ।

14. खेलत्क्षीरसमुद्रसान्द्रलहरीलावण्यलक्ष्मीमुषं
मोषं शैलसुतामदस्य दधती सौभाग्यगर्व्वेण सा ॥ [12]
धर्म्माद्वैतमतिर्गुणाहितरतिः प्रारब्धपुण्याचिति-

15. र्दानोदारधृतिर्म्मतङ्गजगतिर्न्नेत्रा (त्रा) भिरामाकृतिः ।
शास्तृन्यस्तनति[5]जनोदितनुतिः कारुण्यकेलिस्थिति-[6]
नित्यश्रीवसतिः कृताद्यविहतिः स्फायद्गुणाहंकृ

16. तिः ॥ [13]
जगति गहडवाले क्षत्रव (वं) शे प्रसिद्धे-
जनि नरपतिचन्द्रश्चन्द्र (मा) नामा नरेन्द्रः ।
यदसहननृपाणाङ्कामिनीवाष्पवाहेः (हैः)
शितितरमिदमासीद्यामुन (नं) तू (नू) नमम्भः ॥ [14]
नृ-

17. पतिमदनचन्द्रश्चण्डभूपालचूडा-
मणिरजनिसतस्माद्विभ्रदेकातपत्र [म्] ।
धरणितलमनल्य प्रौढतेडो (जो) नलश्रीः
श्रियमपि च मघोनः स्वश्रियाधो दधानः ॥ [15]
वाराण-

18. सी भुवन रक्षणदक्ष एको
दुष्टात्तुरुष्कसुभटादवितुं हरेण ।
उक्तो हरिस्स पुनरत्र वभूव तस्माद्

---

1. Read.कुमार देवी. 2. Read. सुधांशो—. 3. Konow विस्मय—.
4. Ibid. मस्माद्दशैः. 5. Ibid.—नतिर्ज. 6. Ibid.—स्थितिर्नि.

गोविन्दचन्द्र इति प्रथिताभिधानः ॥ [16]
वत्साः कामदुहां कणा-

19 नपि पयःपूरस्य पातु[1] न ते चित्रं
प्रागलभन्त याचकमनः सन्तोषनित्यव्ययात् ।
त्यागैर्यस्य महीभुजः[2] प्रमुदिते तद्याचकानाश्रये
स्वच्छन्दाहितनित्यनिर्भरपयः-

20 पानोत्सवैरासते ॥ [17]
यद्विद्वेषिमहीभुजां पुरवरे प्रभ्रष्टहारावली-
व्याधास्तन्मृगपाशबन्धमनसा [3]गह्लन्तिनैवभ्रमात् ।
व्याधाः स्रस्तसुवर्णकुण्डलमहिभ्रान्त्या

21. तदुत्थायते-
दंण्डैर्द्रागपसारयन्ति च भयप्रोत्कम्पिहस्तस्रजः ॥ [18]
यस्योत्सन्नविरोधिभूपतिपुरप्रासादपृष्ठोपरिप्रत्यप्रस्फुरदुग्रशष्पकवलव्या-
लोलवाजि-

22. व्रजः ।
आदित्यस्त्वभवत्स मन्थररथश्चन्द्रोपि मन्दोभवत्
घा[4]सग्रासविरूद[5]लोभहरिण रक्षन् पतन्तन्ततः ॥ [19]
अहह कुमरदेवी तेन र [ा] ज्ञा प्रसिद्धा
त्रि (ति) जगति

23. परिणीता श्रीरिवेहाच्युतेन ।
प्रविलसदवरोधे तस्य राज्ञोङ्गनानां
नियतममृतरश्मेर्लेखिका तारकासु ॥ [20]
वी[6]हारो नवखण्डमण्डलमहीहारः कृतोयन्तया

24. तारिण्या वसुधारया ननु वपुर्विभ्राणयालंकृतः ।
यं दृष्ट्वा प्रविचित्रशिल्परचनाचातुर्य्यसीमाश्रयं
गीर्वाणैः सुदृश [श्च] विस्मयमगादुद्रागिवश्वकर्मापि सः । (॥) [21]
श्रीधर्मचक्रजि-

25. नशासनसन्निबद्धं
सा जम्बुकी सकलपत्तलि[7]वाग्रभूता ।
तत्ताम्रशासनवर (रं) प्रविधाय तस्यै
दत्वा तया शशिरवी भुवि यावदास्ताम् ॥ [22]
धर्माशोकनराधिपस्य समये श्रीध-

---

1. Konow. पातुं. 2. Ibid. भुजः—. 3. Read. गृह्णन्ति.
4. Ibid. भवद्घास—. 5. रूढलोभहरिणं 6. Read. विहारो.
7. Konow. पत्तलिका—.

26. म(र्म) चक्रो जिनो
याहक् तन्नयरचितः पुनरयञ्चक्रे ततोप्यद्भुतम् ।
वीहा[1]रः स्थविरस्य तस्य च तया यत्नादयङ्कारित-
स्तस्मिन्नेव समर्प्पितश्च वसतादाचन्द्रचण्डद्युति ॥ [23]
तत्कीर्त्तिम्प-

27. रिपालयिष्यति जनो यः कश्चिदुर्वीतले
सा तस्याङ्घ्रियुग प्रणामपरमा यूयं जिनाः साक्षिणः ।
तस्याः कश्चिदनिश्चितो यदि यशोव्यालोपकारी खलः
तं पापीयसमा-

28. शु शासति तुनस्ते लोकपालाः क्रुधा ॥ [24]
एकस्तीर्थिकवादिवारणघटासङ्घट्टकण्ठीरवः
साहित्यो [ज] ज्वलरत्नरोहणगिरिर्योह्यष्टभाषाकविः ।
ख्यातो वङ्गमहीभजः[2]

29. प्रणयभूः श्रीकुन्दनामाकृती
तस्याः सुन्दरवर्णगुम्फरचनारम्यां प्रशस्ति व्यधात् ॥ [25]
एषा प्रशस्तिरुत्कीर्णा वामनेन तु शिल्पिना ।
राजावर्त्तस्य सापत्यन्दधाने प्रस्तरोत्तमे ॥ [26]

46. KAMOULI COPPER PLATE OF GOVINDACHANDRA.

Prov. : Kamouli, near the confluence of the Varunā and the Gangā at Varanasi, U. P.
Date : V. S. 1182 (= 1125–26 A. D.).
Lang. : Sanskrit. **Script.** Nāgarī.
Ref. : F. Kielhorn, *Ep. Ind.* Vol. IV, pp. 99 ff.

Text

1. ओं स्वस्ति ॥
अकुण्ठोत्कण्ठ-वैकुण्ठ-कण्ठपीठ-लुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेस्तु वः ॥ [1]
आसीदशीतद्युति वंश जात-

2. क्ष्मापालमालासु दिवङ्गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना यशोविग्रह इत्युदारहः ॥ [2]
तत्सुतोभून्महीचन्द्रश्चन्द्रधामनिभन्निज-

1. Better विहारः, but this spoils the metre. 2. Konow. भुजः,

3. म्।
येनापारमकूपारपारे[1] व्यापारितं यशः ॥ [3]
तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विषन्मण्डलो
विध्वस्तोद्धतधीत (र) योधतिमिरः

4. श्रीचन्द्रदेवोनृपः ।
येनोदारतरप्रतापशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमन्दोर्व्विक्रमेणार्ज्जितम् ॥ [4]
तीर्थानि का–

5. शिकुशिकोत्तरकोसलेन्द्र–
स्थानीयकानि परिपालयताभिगम्य ।
हेमात्मतुल्यमनिशन्ददता द्विजेभ्यो
येनाङ्किता वसुमती शत–

6. शस्तुलाभिः ॥ [5]
तस्यात्मजो मदनपाल इति क्षितीन्द्र–
चूडामणिर्व्विजयतेनिजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षा–

7. लितं कलिरजःपटलन्धरित्र्याः ॥ [6]
यस्यासीद्विजय प्रयाणसमये तुङ्गाचलोच्चैश्चल–
न्माद्यत्कुम्भिपदक्रमासमभरभ्रश्यन्मही–

8. मण्डले ।
चूडारत्नविभिन्नतालुगलितस्त्यानासृगुद्भासितः
शेषः पेषवशादिव क्षणमसौ क्रोडे निलीनाननः ॥ [7]
तस्मादजाय–

9. त निजायत वा (बा) हुवल्लि–
व (ब) न्धा [व] रुद्ध नवराज्यगजो नरेन्द्रः ।
सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवा–

10. म्बु (म्बु) राशेः ॥ [8]
न कथमप्यलभन्त रणक्षमांस्ति सृषु दिक्षु गजानथ वज्रिणः ।
ककुभि बभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घ–

11. टागजाः ॥ [9]
सोयं समस्तराजचक्रसंसेवितचरणः परमभट्टारकमहाराजाधिराजपरमेश्वर
परममाहेश्व [र] निजभुजोपार्ज्जि–

12. त श्रीकान्यकुब्जा (ब्जा) धिपत्य श्रीचन्द्रदेवपादानुध्यात परमभट्टारक
महाराजाधिराजपरमेस्व (श्व) र परममाहेश्वर श्रीमदनपा–

---

1. Originally—परे seems to have been engraved.

13. लदेवपादानुध्यात परमभट्टारकमहाराजाधिराजपरमेश्वर परममाहेश्वरा-
श्वपति (ति) गजपतिनरपतिराजत्रयाधिप-

14. ति विविधविद्याविचारवाचस्पति श्रीमद्गोविन्दचन्द्रदेवो विजयी हलदोय
पत्तलायां महसोणमौ अ ग्रावा (म) निवासिनो मि (नि)-

15. खिलजनपदानुपगतानपि [च] राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहार·
सेनापति भाण्डागारिकाक्षपटलिकभिषग्रे (ग्नै) मित्तिकान्तःपु-

16. रिक दूत करितुरगपत्तनाकरस्थानगोकुलाधिकारि पुरुषां[1]श्चाज्ञापयति
वो (बो) धयत्यादिशति च यथा विदितमस्तु भवतां यद्वो (यो)परि-

17. लिखितग्रामः सजलस्थलः सलोहलवणाकरः समत्स्याकरः
सपर्ण्णाकरः सगर्त्तोषरः स मधूकचूतवनवाटिकाविटपतृण यूति-

18. गोच [र] पर्यन्तः सोर्द्ध [व्] ाधश्चतुराघाटविशुद्धः स्वसीमापर्यन्तः
संवत् ११८२ माघ सुदि १५ स (श) नौ श्रीमदप्रतीहार समावासे
सोमग्र-

19. हण पर्व्वणि गङ्गायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृ-
गणांस्तर्प्पयित्वा तिमिरपटलपाटनपदु (टु) मसहमुष्णरोचिष-

20. मुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्व्वासुदेवस्य
पूजां विधाय हविषा हविर्भुजं हुत्वा मातापित्रोरा-

21. त्मनश्च पुण्ययशोभिवृद्ध (द्ध) ये कुशलतापूतकरतलोदकपूर्व्वमस्माभि·
र्व्वं (र्ब्ब) न्धुलगोत्राय व (ब) न्धुलाघमर्षण-
विश्वामित्र त्रि [प्र] वरा-

22. य दीक्षित श्रीपुरुषोत्तमपौत्राय दीक्षित श्रीवीह्लापुत्राय
महापुरोहित श्रीजागूश[2]र्म्मणे आचन्द्रार्कं शासनीकृत्प (त्य)-
प्रदत्तो (त्तो)

23. मत्वा यथादीयमानभागभोगकर प्रवणिकरकूटकप्रभृति-
समस्तादायानाज्ञाविधि (धे) यीभूयदास्यथ ॥ भवन्तिचात्र पुण्यश्लो·

24. काः॥
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्गगामिनौ ॥
शङ्ख भद्रासनं च्छ (छ) त्रं वराश्वा व-

25. र वारणाः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरन्दर ॥
सर्व्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः ।
सम्म [ा] न्योयं धर्म्म-

26. सेतुर्न्नृपाणां
काले काले पालनीयो भवद्भिः ॥

---

1. Kielhorn पुरुषानाज्ञा—.

2. Kielhorn—शर्मण.

व (ब) हुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य त-

27. दाफ़लम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
स वि[ष्ठा]यां कृमिर्भूत्वा पितृभिः सहमज्जति ॥
श्रीवास्तव्यकुलो-

28. द्भूत कायस्थोल्हणसूनुना ।
लिखितस्ता[1]म्रपट्टोयं कीठणेन नृपाज्ञयेति ॥ छ ॥ छ ॥

47. BANARAS COPPER PLATE GRANT OF GOVINDCHANDRA

Prove. : Varanasi, U. P.
Date. : V. S. 1162 = 1105. A. D.
Lang. : Sanskrit. **Script.** : Nāgarī of the 12th century. A. D.
Ref. : Arther Venis, *Ep. Ind.* II, pp. 359–61.

Text

1. ॐ नमो भगवते वासुदेवाय ॥
तमाद्यं सर्व्वदेवानां दामोदरमुपास्महे ।
त्रैलोक्यं यस्य वक्षीव क्रोडान्तःस्थं वलित्रयी ॥ [1]
वंसे[2] गाहडवालाख्ये बभूव विजयी नृपः ॥

2. महीयलसुतः श्रीमाञ्चलनाभागसन्निभः ॥ [2]
याते श्रीभोजभूपे विबु[3]धवरवधूनेत्रसीमातिथित्वं
श्रीकर्ण्णे कीर्त्तिशेषं गतवति च नृपे क्ष्मात्यये जायमाने ।

3. भर्त्तारं यं धरित्री त्रिदिवविभुनिभं प्रीतियोगादुपेता
त्राता विश्वस्य पूर्व्वं समभवदिह स क्ष्मापतिश्चंद्रदेवः[4] [4]
तस्माद्भूद्रिषदिलापतिदन्तिसिंहः
क्षोणीपति-

4. मंदनपाल इति प्रसिद्धः ।
येनाक्रियन्त वभुशः[5] समरप्रवन्धाः[6]
सन्नर्त्तितप्रहतशत्रुकवन्धवन्धाः[7] ॥ [4]

---

1. Ibid.—ताम्र—. 2. A. Venis. वंशे. 3. Ibid. विबुध.
4. Ibid. चन्द्रदेवः 5. Ibid. बहुशः 6. Ibid. प्रबन्धाः
7. Ibid. कबन्धबन्धाः

तस्मादजायत नरेश्वरवृन्दवंद्य[1]–
पादारविंदयुगलो ज्व–

5. लितप्रतापः ।
क्षोणीपतीन्द्रतिलको रिपुरग[2]भंगी
गोविन्दचन्द्र इति विश्रुतनामकीर्त्तिः ॥ [5]
तिष्ठतो यस्य दोःस्तम्भे मत्तसौयैंकदन्तिनः ।
धनुर्गुणकिणश्रेणी म–

6. दराजीव लक्ष्यते ॥ [6]
संवत्सहस्रैके द्विषष्ट्युत्तरशताभ्यधिके कार्त्तिकशैर्ण्ण[3]मास्ये
भौमे दिनेऽङ्केपि संवत् ११६२ सुदि ५[4] भौमे अद्येह
श्रीमद्विष्णुपुरावासितश्री–

7. विजयकटके सकलकल्मषक्षयकारिण्यां गंगायां[5] स्नात्वा ॥
यथाविधानं मंत्रदेवऋ[6]षिमनुष्यभूतपितृंस्तर्पयित्वा । सूर्यं
भट्टारकं संपूज्य । भगवन्तं महेश्व[7]–

8. रं समभ्यर्च्चर्य । विश्वाधारं वासुदेवं समाराध्य । मंत्रपूतं[8]
भुतवह[9] हुत्वा । पंचा[10]लदेशे जीआवतीपत्तलायां उसिथागामे[11]
समस्तविषयसार्श्वं[12]वर्त्तिसमस्त–

9. महत्तमजनपदान्सं[13]बोधयति समाज्ञापयति ॥ यथा ग्रामोयं
मया स्वसीमऽतृणयूतिगोचरपर्यन्तः सजलस्थलः साम्रमधूकः
सगर्त्तोषरपाषाणः स–

10. नदीवनलोहलवणाकरः सदशापराधदण्डः साकाशपातालः
स्वसीमाचतुराघाटविशुद्धान्वः पूर्व्वदत्तदेवब्राह्मणवर्जितः ।
नलिनीदलगतजल[14] ।

11. लवतरलतरं प्राणिना[15] जीवित विज्ञाय । करिकलभकर्णाग्रविलसितचपलां
लक्ष्मीं विलोक्य । जलबुद्बु[16]दाकारं यौवनं परिज्ञाय ।
कदलीदण्डव–

12. त् संसारमसारतरं[17] समाकलय्य ॥ साथिवदेशनिर्गताय

---

1. Ibid.—वृन्दवन्द्य पादारविन्द— 2. A. Venis. रिपुरङ्गभङ्गी गोविन्दचन्द्र
3. Ibid. पौर्णमास्यां 4. Ibid. १५ instead of ५.
5. Ibid. गङ्गायां 6. Ibid. मन्त्रदेव ऋषि मनुष्यभूतपितृंस्तर्पयित्वा
7. Ibid. महेश्वर 8. Ibid. मंत्र— 9. Ibid. हुतवत—
10. Ibid. पञ्चाल— 11. Ibid. ग्रामे. 12. Ibid पार्श्ववर्ति—
13. Ibid. सम्बोध. 14. This sign of punctuation is superfluous.
15. A. Venis. प्राणिनां जीवितं 16. Ibid. बुद्बुदा. 17. Ibid. तरं.

वाजसनेयसाखोमृगाय वंधुलगोत्राय वधुल[1] अघमर्षणविश्वामित्र त्रिपवराय ॥

13. दीक्षितनागानद[2]पौत्राय दीक्षितपुरवासपुत्राय [3]यजुर्वेदविद्यानलिनीविकासनप्रत्यक्षभास्कराय दीक्षितवील्हाकाय ।
श्रद्धाविशुद्धमनसा

14. महाराजपुत्रश्रीमद्गोविद[4]दचंद्रदेवेन कुशपूतहस्तोदकेन कार्त्तिक्यां निमित्ते सम्यगाजू[5]यास्मै व्राह्मणार्या[6] मातापित्रोरात्मनश्च
यशःपुण्यवि-

15. वृद्धये चंद्रार्क्कदिधि[7]क्षितिपवनाम्बराणि यावत् शासनीकृत्य प्रदत्तः । मत्वा यद्दीयमानभागभागकूटकदशवधविशति-
छुवथाकेरे तुरु-

16. ष्कदण्डप्रभृतिसर्व्वादायान[8] तत् सर्वमस्मै निसेदनीय[9] ॥ ये यास्यन्ति महीमृतो मम कुले किं वा परस्मित्पुर[10]स्तोषामेष मयाजलिर्विरचित्ता नादेय-

17. सत् कियत् दूर्व्वामात्रमपि स्वधर्म्मनिरता दत्त सदा पाल्यता[11] वायुर्वास्यति तरम्यति प्रतिपन श्रुत्व मुनीना वचः ॥ [7]
अत्राथ पौराणिकाः-

18. श्लोकाः ॥
भूमि[12] यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्ग्गगामिनौ ॥ [8]
योर्च्चितं प्रतिगृह्णाति ददात्यर्च्चि-

19. लमेव वा ।
तावुभौ गच्छतः स्वर्ग्गं नरकं तु विपर्यये ॥ [9]
वहुदि[13]र्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य सत्य यदा भूमिस्तस्य तस्य तदा-

20. फलं[14] ॥ [10]
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्म्मार्थयशस्कराणि ।

---

1. Ibid. बंधुल.
2. Ibid नन्द.
3. Ibid यजुर्वे.
4. Idid. गोविन्दचन्द्र
5. Ibid. सम्यगाह्वया—
6. Ibid. ब्राह्मणाययि
7. Ibid. चन्द्रार्कोदधि क्षिति पवनाम्बराणि
8. A. Venis.—यान्
9. Ibid. निवेदनीयम्.
10. Ibid. परस्मिन्पुरस्तेषामेष मयाञ्जलिर्विरचितो नादेयमस्मात् कियत् ।
11. Ibid. सवधर्म्म, दत्तं, पाल्यतां
12. Ib!d. भूमिं.
13. Ibid. बहुभि—
14. Ibid. तदा फलम्

निर्म्माल्यवत्त[1]त्प्रतिमानि तानि को नाम साधुः पुनराददीत ॥ [11]
अस्मत्कुलं पर-

21. मुदारमुदाहरद्भिरनैश्च[2] दानमिदमच ।[3] णुमादनीयं ।
लक्ष्यास्तडित्सलिलवुद्‌वु[4]दचंचलाया दानं फलं परयशःपरिपालनं[5]धज-
षंखभद्रासनं-

22. छत्र वराश्वा वरवारेणाः[6] ।
भूमिदानस्य चिह्नानि मसं ❀ ❀ [7]पुरंदर [13]
स्वदत्तां परदत्तां वा यो देरत वसंधरां ।
स विस्टायां [8]कृमिर्दूला पितृभिः स

23. ह मज्जति ॥ [14]
प्रतीहारगौन[9]मश्क जागूकश्च पुरोहितः ।
जननी राल्हदेवी च वाल्हणश्च महत्तकः ॥ [15]
एतेषां संमर्त्ति प्राप्य सम्यग्लिखित-

Reverse

24. वानिदम् ।
नाम्ना विजयदासाख्यः शासनं राजसंमतम् ॥ [16]

48. KHAJURAHO STONE INSCRIPTION OF CHANDELLA YAŚOVARMAN.

Prov. : Khajuraho, M. P.
Date. : V. E. 1011 (953–54 A. D.).
Lang. : Śanskrit. **Script.** : Kutila Devanāgarī.
Ref. : Keilhorn, *Fp. Ind*. Vol. I. pp. 122–135.

Text

1. ओं नमो भगवते वासुदेवाय ॥
दधानानेकां यः किरिपुरुषसिं [होभय] जुषं

---

1. Ibid.—वान्त— 2. A. Venis.—अन्यैश्च.
3. Ibid.—मिदमभ्यनुमोदनीयम् 4. Ibid. लक्ष्म्या and चञ्चलाया.
5. Ibid. परिपालनञ्च. 6. Ibid. शङ्ख भद्रासनं छत्रं वराश्वा वरवारणाः
7. A. Venis restores फलं स्वर्गः पुरन्दरः.
8. Ibid. हरेत वसुन्धराम् । स विष्टायां कृमिर्भूत्वा । 9. Ibid.—गोतमश्च

त [दा] कारोच्छेद्यां तनुमसुरमुख्यानजवरात् ।
जघान त्रीनुग्रान्ज (ञ्ज) गति कपिलादीनवतु वः
स वैकुण्ठः कण्ठध्वनिचकितनिःशेषभुवनः ॥ [1]
पायासुर्व्वं (र्व) लिवन्च (ञ्च) नव्यतिकरे देवस्य विक्रान्तयः
सद्यो विस्मितदेवदानवनुतास्तिस्रस्ति [लो] कीं

2. हरेः ।
यासु ब्र (ब्र) ह्मवितीर्ण्णमर्घसलिलं पादारविन्दच्युतं
धत्तेद्यापि जगत्त (त्त) यैकजनकः पुण्यं स मूद्ध्र्ना हरः ॥ [2]
देवः पातु स वः पयःकणभृति व्योम्नीव ताराचिते
दैत्याशिव्रणलां[1]च्छने दिविसदः संत्यज्य सर्व्वानपि ।
तस्मिन्नञ्जनशैलभित्तिविपुले वक्ष [:] स्थले यस्य ताः
पेतुर्मन्दरसङ्गसंभ्रमवलल्लक्ष्मीकटाक्षच्छटाः ॥ [3]
गंभीरो-

3. म्बु (म्बु) धयः शशांकरुचिमान्भास्व [त्प्र] तापोज्व (ज्ज्व) लो
धीरो धात्रि महान्महीधरवराः कल्पद्रुमास्त्यागवान् ।
आकल्पादविकल्पनिर्म्मलगुणग्रामाभिरामः[2] प्रभुः
सत्यं ब्रु (ब्रू) त यदि क्वचित्पुनरभूत्तुल्यो यशोवर्म्मणः ॥ [4]
प्रधानादव्यक्तादभवदविकारादिह
महानहंकारस्तस्मादजनि जनितोपग्रहगणः ।
ततस्तन्मात्राणि प्रसव-

4. मलभ[3]न्त क्र [म] वशा-
दथैतेभ्यो भूतान्यनु भुवनमेभ्यः प्रववृते ॥ [5]
इहाद्यो विद्यानां कविरखिलकल्पव्युपरतौ[4]
परः साक्षी देवस्त्रिभुवनविनिर्माणनिपुणः ।
स विश्वेषामीश [:] स्मितकमलकिञ्जल्कवसति-
र्महिम्ना स्वेनैव प्रथममथ वेधाः प्रभुरभूत् ॥ [6]
तस्माद्विश्वसृजः पुराणपुरुषादाम्नायधाम्नः कवे-
र्येभूवन्मु-

5. नयः पवित्रचरिताः पूर्व्वे मरीच्यादयः ।
तत्रात्रिः सुषुवे निरन्तरतपस्तीव्रप्रभावं सुतं

---

1. Kielhorn लाञ्छने.
2. Originally the akshara मा was omitted and is engraved above the line.
3. The original had—लभन्त
4. The two letters were originally omitted and are engraved above the line.

चंद्रात्रेयमकृत्रिमोज्व (ज्ज्व) लतरज्ञानप्रदीपं मुनिं ॥ [7]
अस्ति स्वस्तिविधायिनः स जगतां निःशेषविद्याविद्-
स्तस्यात्मोपनताखिल [श्रु] तिनिधेर्व्वन्शः[1] प्रशंसास्पदं ।
यत्राभून्न पराक्रमेण लघुता नो चाटुकारोद्धति-
र्नाल्पप्यंतरसा-

6. रता न च फलप्राप्ति [:] क्षयायात्मनः ॥ [8]
त्रस्तत्राणप्रगुणमनसां सर्व्वसंपत्प्रदाना-
मुद्युक्तानां कृतकृतयुगाचारपुण्यस्थितीनां ।
तत्रत्यानाममलयशसां भूभुजां का प्रशंसा
येषां शक्तिः सकलधरणीध्वंसने पालने वा ॥ [9]
तत्र क्षत्रसुवर्ण्णसारनिकषग्रावा यशश्चन्दन-
क्रीडालंकृतदिक्पु-

7. रन्ध्रिवदनः श्रीनन्नुकोभून्नृपः ।
यस्यापूर्व्वपराक्रमक्रमनमन्निःशेषविद्वेषिणः
संभ्रान्ताः शिरसावहन्नृपतयः शेषामिवाज्ञां भयात् ॥ [10]
यस्यानंदितवंदिवृंदरचितस्तोत्रक्रियाप्रक्रमा-
त्संक्रान्तस्व (स्ब) हुवैरिवर्गजयिनः कंदर्पकल्पाकृतेः ।
नाम क्षामतनूभृतां मृगदृशां सद्यो विधत्ते पदं
स्वान्तेषु

8. द्विषतां च०राशिषु व (ब) लाद्वैक्लव्यमन्यामतं ॥ [11]
तस्मादभूदाजिपराजितारेः श्रीवाक्पतिर्व्वाक्पतितुल्यवाचः ।
यस्यामला भ्राम्यति भानुभाभिः सहैव लोकत्रितये[2]पि कीर्त्तिः ॥ [12]
यस्यामलोत्पलनिषन्न (ण्ण) किरातयोषि-
दुद्गीततद्गुणकलध्वनिरम्यसानुः ।
क्रीडागिरिः शिखरनिर्ज्झरवारिपातझात्का-

9. रताण्डवितकेकिगणः सविन्ध्यः ॥ [13]
तस्माद्विस्मयधाम्नः क्षीरा[3]ब्धेश्चन्द्रकौस्तुभौ यद्वत् ।
द्वावात्मजावभूतां जयशक्तिर्विजयशक्तिश्च ॥ [14]
तयोर्द्वयोरप्यमितप्रतापदावाग्निदग्धाहितकाननानि ।
कर्माणि रोमांचजुषः समेताः समूर्द्धकम्पं क्षितिपा [:] स्तुवन्ति ॥ [15]
तत्रानुजन्मा तनयं राहिलाख्यमजीजनत् ।
निद्राद-

1. Kielhorn—र्व्वंशः.
2. The original had—त्रितयोपि
3. The original had—क्षीरोब्ध— Kielhorn suggested क्षीराब्धे—.

10. रिद्गतां यान्ति यम्विचिन्त्य[1] निशिद्विषः ॥ [16]
भीमभ्राम्यदसि (स्तु) चि स्त्रवदसृक्संपादिताज्यक्रिये
ज्यानिर्घोषवषट्पदे क्रमचरत्संरब्ध (ब्ध) [यो] धित्विजि ।
अश्रान्तः समराध्वरेप्रतिहतक्रोधानिलोद्दीपि [ते]
[वै] रोदर्चिषि यः पशूनिव कृती मन्त्रैर्जुहाव द्विषः ॥ [17]
श्रीहर्षभूपमथ भूमिभृताम्वरिष्ठः[2]
सोसूत कल्पतरुकल्पमन-

11. ल्पसत्व (त्त्व): [।]
अद्यापि यस्य सुविकासियशःप्रसून-
गन्धाधिवाससुरभीणि दिगन्तराणि ॥ [18]
यत्र श्रीश्च सरस्वती च सहिते नीतिक्रमो विक्रम-
स्तेजः सत्व (त्त्व) गुणोज्व (ज्ज्व) लं परिणता क्षान्तिश्च नैसर्गिकी ।
सन्तोषो विजिगीषुता च विनयो मानश्च पुण्यात्मन-
स्तस्यानन्तगुणस्य विस्मयनिधेः किन्नाम वस्तु स्तुमः ॥ [19]
भीरुर्द्धर्मापराधे मधुरिपु-

12. चरणाराधने यः सतृष्णः
पापालापेनभिज्ञो निजगुणगणनाप्रक्रमेष्वप्रगल्भः ।
शून्यः पे (पै) शुन्यवादेनृतवचनसमुच्चारणे जातिमूकः
सर्व्वत्रैवं स्वभावप्रथितगुणतया नाम [कः स्तू] यतेसौ ॥ [20]
सोनुरूपां सुरूपाङ्गः कञ्चुकाख्यामकुण्ठधीः [।]
सवर्णा[3]म्विधिनोवाह चाहमानकुलोद्भवां ॥ [21]
यस्यः पतिव्रततुलामधिरोढुमी-

13. श
नारुन्धती गुरुतरामभिमानिनीति ।
पत्युः समीहितविधानपरापि साध्वी
कार्श्यन्तथा परमगादतिलज्जितेव ॥ [22]
गौडक्रीडालतासिस्तुलितखसव (ब) लः कोशलः कोशलानां
नश्यत्कस्मी (श्मी) रवीरः शिथिलितमिथिलः कालवन्मालवानां ।
सीद [त्सा] वद्यचेदिः कुरुतरुषु मरुत्संज्वरो गूर्जराणां
तस्मात्तस्यां स जज्ञे नृपकुल-

14. तिलकः श्रीयशोवर्मराजः ॥ [23]
स दाता राधेयः स च शुचिवचाः पांडुतनयः
स शूरः पार्थोपि प्रथितमहिमानः किमपि ते ।
व्यतीताः किं ब्रू (ब्रू) मो यदि पुन [रि] ह स्युः स्वचरिते

---

1. Ibid. यं विचिन्त्य.
2. Kielhorn—तां वरिष्ठः.
3. Kielhorn. सवर्णां वि—

[ह्नि] या नव्वी (व्वी) कुर्युर्वदनमवलो [क्यै] नमधुना ॥ [24]
त्रस्तत्रातरि तत्र भूभृति नृणां क्लेशाय शस्त्रग्रहः
कामं दातरि सिद्धकेलिसुमनस्तल्पाय कल्पद्रुमाः [।]
वित्तेशः पर-

15. म (मा) र्थबुद्धिविधुरस्वान्तो विलासी स चे-
दास्ये तस्य सर्तान्दुरुत्पलवनप्रीत्यै हशामुत्सवं ॥ [25]
यस्योद्योगे व (ब) लानां प्र [स] रति रजसि व्याप्त [भे] दो [न्तराले]
स्वः सिन्धुर्व्वं (र्ब्बं) द्धरोधाः पिहितरुचिरभूद्भानुरादर्शरम्यः ।
स [म्य] ग्देवेन्द्रदन्ती मुदमथित वियत्साभ्रमालोच्य हन्साः[1]
सोत्कण्ठास्तस्थुरासीन्नयनदशशती कूणितावृत्तशत्रोः ॥ [26]
अन्योन्याव (ब)-

16 द्धकोपद्विपकलहमिलद्दन्तदण्डाभिघात-
प्रोद्यज्ज्वजा (ज्ज्वा) लाकलापप्रसृतहुतभुजि ज्याघनध्वानभीमे ।
पीतासृच्चा (क्चमी) वरच्चः प्रमदक [लकल] हाद्रौ [द्र प्रहासे]
धीरं भी [तेव लक्ष्मीः समरशि] रसि यं सं [भ्रमा] दालि [लिङ्ग] ॥ [27]
उत्तुङ्गाञ्जनशैलसन्निभचलन्मत्तद्विपेन्द्रस्थित-
क्रुध्यद्दुर्द्धरधन्विमार्गणगणप्रारब्ध (ब्ध) रक्षाक्रियं ।
विख्यातक्षितिपालमौ-

17. लिरचनाविन्यस्तपादाम्बु (म्बु) जं
संख्येसंख्यव (ब) लं व्यजेष्ट गतभीर्यश्चेदिराजं हठात् ॥ [28]
